ISSN 0976-8645

## JAHNAVI SANSKRIT E-JOURNAL

### नूतनाङ्के भवतां सर्वेषां मङ्गलाभिनन्दनम्।




www.jahnavisanskritejournal.com



| | |
|---|---|
| मुख्यसम्पादकः | डॉ॰ सदानन्दझा, व्याकरणविभागाध्यक्षः, आदर्शमहाविद्यालयः दरभङ्गा, बिहारः |
| पुनर्वीक्षकः | प्रो. पीयूषकान्तदीक्षितः, न्यायविभागः, लालबहादुरसंस्कृतविद्यापीठम्, नवदेहली |
| सम्पादकः प्रकाशकश्च | बिपिन कुमारझा, साहित्यविभागाध्यापकः (अनु.), राष्ट्रियसंस्कृतसंस्थानम्,हि.प्र. |
| सम्पादनसहायकौ | डा. आचार्यसुमनः, संस्कृतविभागाध्यक्षः, जैनविश्वविद्यालयः, बेङ्गळूरुनारायणदत्तमिश्रः, शोधच्छात्रः, जवाहरलालनेहरुविश्वविद्यालयः, नवदेहली |
| प्रकाशनसहायिका | ललिताजाङ्गरा, शोधच्छात्रा, पञ्जाबविश्वविद्यालयः, चण्डीगढ |
| प्रतिनिधिः(लोकार्पणसन्दर्भे) | डा. सुमन दीक्षित, केन्द्रीयविश्वविद्यालयः, कर्णपुरम् |
| तकनीकिसहायकः | लिङ्गुआ-मार्ट, नवदेहली |





## JAHNAVI-A First Electronic Peer-reviewed Quarterly Refreed Sanskrit *Triveni* (Sanskrit, Hindi & English) Journal.

## INDEX



| | | |
|---|---|---|
| **I** | प्रस्फुटम | |
| 1 | सम्पादकीयम | डा. सदानन्द झा |
| 2 | प्रकाशकीयम | बिपिन कुमार झा |
| 3 | **FAQ** | |
| **II.A** | साहित्यानुरागः | |
| 1 | पुराणेषु वर्णिता शासनव्यवस्था | डा. रामनारायण ठाकुर |
| 2 | The role of Sanskrit in the present curriculum. | Dr. Anil Pratap Giri |
| 3 | प्रमाणेषु साक्षिप्रत्यक्षस्य वैशिष्ट्यम | Dr.Suman K.S. |
| 4 | कुन्तकस्य दृक्कोणतः नैषधीयशब्दानां शुद्धिसमीक्षा | साधनकुमारपात्रः |
| 5 | वक्रोक्तिध्वनिप्रस्थानयोस्तुलना – एका समीक्षा | डा. हीरालालदाशः |
| 6 | "चोदनालक्षणोऽर्थो धर्मः" इत्यत्रार्थपदविमर्शः | नारायणदत्तमिश्रः |
| 7 | नाट्यशास्त्रस्य वैशिष्ट्यम | डा. गीता शुक्ला |
| 8 | प्रत्यक्षप्रमाणविषये इन्द्रियार्थसन्निकर्षः | सियंका शर्मा |
| 9 | अष्टाङ्गयोगविमर्शः | आकांक्षाशुक्ला |
| 10 | महाकाव्य में हृदयस्पर्शी पक्षीवर्णन | श्रीमती प्रेमलता भाटी |
| **II.B** | अनुसन्धान-परिशीलनम | |
| 1 | राष्ट्रोत्कर्षाय शोधसन्दर्भे संस्कृतं प्रौद्योगिकी च | श्रीबिपिनकुमारझा&डा. सदानन्दझा (डी. लिट्) |
| **III** | शृङ्खलाप्रभागः | |
| 1 | RELIGION AND MODERN SCIENCE | Prof. Piyushkant Dixit |
| 2 | वैश्विकपरिप्रेक्ष्यमेंवर्तमान संस्कृत–अध्ययनकेन्द्र | नारायणदत्तमिश्र |
| 3 | जैन सम्प्रदाय एवं भारतीय संस्कृति का मिथः सम्बन्ध | डा. मुकेश कुमार झा |
| 4 | सुबन्तसूत्राणां वर्गीकरणम्डॉ . त्रिलोकझा | |
| | वार्षिकाङ्कसन्दर्भिता सूचना | |
| | **Important dates for next Issue.** | |

# प्रस्फुटम्



A First EPQRST Journal-www.jahnavisanskritejournal.com ISSN 976-8645

## सम्पादकीयम्



डॉ. सदानन्द झा[1]

कालीनःकुशलंकरोतुसततंतारातनोतुश्रियं
दीर्घायुर्भुवनेश्वरीवितनुतांविघ्नंहतात्षोडशी।
भैरव्यस्त्वशुभापहारिपुगणान्साछिन्नमस्ताहता
न्मातङ्गीबगलामुखीचकमलाधूमावतीपान्तुनः।

अयेसुरभारतीसमाराधनतत्परान्तःकरणाविद्वज्जनाःसहृदयाःपाठकाः
विश्वस्य प्रथमान्तर्जालीयसंस्कृतत्रैमासिकपत्रिका जाह्नव्याःसंयुक्ताङ्कमेकादशद्वादशाङ्कं सहृदयविवेचकविदुषां पुरतः समुपस्थापयन् महान्तमानन्दमनुभवामि।

यद्यपि संस्कृतपत्रिका संचालनकार्यं दुष्करं यथामणिमण्डितव्यालस्य परिष्करणं तथापि राष्ट्रियान्ताराष्ट्रियशतशोख्यातिलब्धपण्डितानां साहाय्येनेयं पत्रिका सारस्वतरंगस्थले नरीनृत्यते।

सत्यमेवैतत् कृष्णकालकालुष्यसंयुतसंसारप्रभावात् सम्प्राप्तोच्चपदप्रभावदर्पिणोऽधिकारिणः पक्षपातैकप्रवीणमनसः सदैव सद्वृत्तमनुष्ठतः प्रतिभावतो जनान् अधोगमयन्ति। अद्यत्वे मत्कृतेऽपि सैव चरितार्था। एतस्मादेव कारणात् जाह्नवी प्रभाविता जातेति हेतोः पठकानां करसरसिजेषु समर्पणे विलम्बः संजातः। एतदर्थं खिद्यते मे मनः।

प्रकृताङ्कद्वयस्य व्याकरणदर्शनसाहित्यपुराणशास्त्राणां गहनशोधनिबन्धाः प्रकाशिताः यत्र भारतीयदर्शनानुमानम्, परमलघुमञ्जूषामतेवृत्तिविचारः, पाणिनीयव्याकरणे प्रतिफलितानि दार्शनिकतत्त्वानि, कुन्तकस्य दृक्कोणतः नैषधीयशुद्धिसमीक्षणं, पुराणेषु शासनव्यवस्था द्रष्टुं शक्याः। नानाशास्त्रपण्डितानामालेखेन्अनुसन्धित्सूनांमहानुपकारो भविष्यतीति मे द्रढीयान् विश्वासः। आशास्महे यदनया समेषां तत्त्वचिन्तकानां महानानन्दः समुदियादिति। अद्यत्वेऽपि विभिन्नप्रान्तेभ्यः महत्वाधायिनो शोधनिबन्धाः

[1] पत्रिकायाः मुख्यसम्पादकः।

समागताः यदीय कृपालवमासाद्य जाह्नवीयं समुज्जृम्भमाणास्ति तेभ्यो भूयोभूयः साञ्जलिं कार्तज्ञं प्रकटयामः जाह्नवीपरिवाराः वयम्।

श्रुतध्वनि मनोहरा शुभापावनी

स्मृताप्यतनुतापहृत् समवगाहसौख्यावहा

निषेव्यपदपंकजा बिबुध मान्याऽमला

समस्तजगतीतले प्रवहतादियं जाह्नवी।

श्रैमत्कः

झोपाख्यः सदानन्दः

लखनौरम्, विहारः
महालया





## प्रकाशकीयम □



बि□नकुमारझा[2]

भक्तत्राणपरायणा भवभयाऽभावं समातन्वती

या देवीह सुदर्शनं नृपमणिं संरक्ष्य युद्धे खरे।

या चास्मै समुदात् स्वराज्यमखिलं स्वीयं हृतं शत्रुभिः

पायात् सा भुवनेश्वरी भगवती मां सर्वदा शर्मदा॥

आराष्ट्रं साम्प्रतं जगदम्बिकायाः महालक्ष्म्याः, नरकासुरसंहर्तुः श्रीकृष्णस्य तथा बलिनियन्तुः त्रिविक्रमस्य पूजनोत्सवे सल्लीनं दरीदृश्यते । एतदवसरे जनाः विस्फोटकानि उद्दीप्य तच्छब्दैः तद्वर्णजातैश्च प्रकाशैः आनन्दमनुभवन्ति केचन परानन्दम् अपहरन्ति च । अनेन विधिना दिनानि दिनमणिना उन्नीयमानानि सन्ति । सन्दर्भेऽस्मिन् दूराद्दूरं गमनागमने सोत्साहेन सज्जिताः जनाः रेलयानस्य महासम्मर्दे अपि आनन्दमनुभवन्ति । एवं दृश्यते यत् अस्माकं समग्रो देश अपि अनेकैः वर्णैः विनिर्मितः विद्यते । एवमेव अस्माकं पाठकाः लेखकाश्चापि विविधप्रान्तीयाः विविधभाषाभाषिणः सन्ति किन्तु संस्कृतत्रिपथगामिन्यां सर्वेऽपि सममेव अवगाहन्ते आत्मनश्च पुनीतान् मन्यन्ते । तर्हि नूनमेवेयं पत्रिका जाह्नवी जाता न पुनः नाममात्रेण । तदर्थं भवतां सर्वेषां सहनशीलसहकारः सर्वथा अपेक्षित एव।यतोहिविदुषां प्रमुखसदस्यानाञ्च कार्यान्तरेषु व्यस्तत्वात् सज्जितोऽपि गताङ्कः भवतां करकमलेषु नागतः ।तस्मात् क्षन्तुमर्हन्ति करुणावरुणालयास्सुधियः विचारेऽस्मिन् इति सादरं निवेद्यते । तत एव अंकद्वयस्य प्रकटनम् अस्मिन्नेवावसरे प्राकाश्यन्नीयते ।

साम्प्रतिके युगे विविधविश्वविद्यालयेषु शोधस्य का स्थितिः इति न गूढविषयः । कोऽत्र दोषः कस्य दोषः किं समाधानम् इति नैके प्रश्नाः समायान्ति मनसि । तत्रैव कतिपयशोधाः महान्तः उपकारकाः भवन्ति विशेषतोऽस्माकङ्कृते अस्मत्समाजस्य कृते, राष्ट्रस्य कृते च इत्यादीनां विषये साहित्यविभागीयाध्यापकैः मान्यैः

[2]प्रकाशकः सम्□ादकश्च

श्रीमद्भिः सुज्ञानवद्भिः महाभागैः सह विमर्शः जातः | तत्रैवास्मिन् विषये एका सङ्कल्पना सुदृढा संजाता ।

अस्यां पत्रिकायामेव नूतनतया अस्याः संकल्पनायाः अन्वितिः भवतात् 'यत् वर्तमानजगति संस्कृतविषयवस्त्वधिकृत्य केषु विषयेषु शोधः अभवत् ? शोधस्य का स्थितिरस्ति? तत्र परिष्कारस्यावश्यकता चेत् तर्हि केनोपायेन परिष्कारः स्यात् इति विषयमधिकृत्य साहित्यानुरागस्यैव एकः नूतनः विशेषप्रभागः अत्र योज्यते । प्रारम्भिके समये अस्य प्रभागस्य श्रीगणेशार्थनिमित्तं विविधविश्वविद्यालयस्थाः अस्माकं प्रतिनिधयः ( बेङ्गळूरुनगरस्थ जैनविश्वविद्यालयस्य संस्कृतविभागः , पाण्डिचेरीविश्वविद्यालयः, राष्ट्रियसंस्कृतसंस्थानम्, ला.ब.शास्त्रिविद्यापीठम्, जगद्गुरुरामानन्दाचार्यविश्वविद्यालयः, पंजावविश्वविद्यालयः, दिल्लीविश्वविद्यालयः, लखनऊविश्वविद्यालयः, मिथिलाविश्वविद्यालयः, राष्ट्रियसंस्कृत संस्थानस्य विविधादर्शमहाविद्यालयाः , विभिन्नप्रौद्योगिकिसंस्थानम्, जवाहरलालनेहरुविश्वविद्यालयः, विश्वभारती, शान्तिनिकेतनम्, जादवपुरविश्वविद्यालयः, सिद्धोकान्हो विश्वविद्यालयः ) साहाय्यरूपे भविष्यन्ति । यदि भवन्तः अपि साहाय्यं कर्तुमिच्छन्ति तर्हि महान् प्रमोदः, साक्षात् editor@jahnavisanskritejournal.comjahnavisanskritjournal@gmail.comतथा CC to kumarvipin.jha@gmail.comइत्यस्मै स्वकीयविचारान् लेखान् वा प्रेषयन्तु ।

इदानीश्च नारायणदत्तमिश्रः, ललिताजाङ्गडा, डा. प्रदीप झा, प्रो. पीयूषकान्तदीक्षितमहोदयः इत्येवमादयो विपश्चिदपश्चिमाः साक्षात् रूपेण सम्पादने-प्रकाशने-पुनर्वीक्षणे च स्वपरिश्रममर्पितवन्त इत्यतो एतेषां कृते भूयोभूयः सकार्तज्ञं धन्यवादान् व्याहरति जाह्नवी । अन्ये ये के च उपकारकाः साक्षाद्वा परोक्षेण सन्ति तेषां कृते अपि नमोवाकं प्रशास्महे । दीपावलीपर्वणः शुभाशयपुरस्सरं पुनश्च अनेकशः धन्यवादाः ॥

विद्वच्चरणचञ्चरीकः,

बिपिनकुमारझा

बलाहरस्थ-वेदव्यासपरिसरः, हिमाचलप्रदेशः
कार्तिकमासः, २०१२





## NEW FAQ

**शोधप्रकाशित होने के लिए आवश्यक शर्तें।**

(जहाँ पूर्वप्रदत्त आंग्लनियमावली से वैमत्य हो, आंग्लनियमावली ही मान्य होगी।)

1. मौलिकता
2. अन्यत्र कहीं न तो प्रकाशित हुआ हो न प्रकाशित होने के लिये भेजा गया हो। (यदि अन्यत्र कहीं प्रकाशित हुआ है और संस्कृतजगत् हेतु महान् उपकारक है तो इसे शृङ्खला प्राभाग में मूलप्रकाशक के विवरण के साथ सम्पादकमण्डली के अनुदन पर प्रकाशित किया जा सकेगा)
3. Undertaking form प्रेषण (यह Home page पर Form पर प्राप्य है।)
4. Essential data form पूर्ति (यह Home page पर Form पर प्राप्य है।)
5. संस्कृत में निबद्ध हो अथवा संस्कृत विषयवस्तु हो एवं संस्कृत्, आंग्ल अथवा हिन्दी मे निबद्ध हो।
6. इस पत्रिका में प्रकाशित साहित्यानुरागः प्रभाग के निमित्त ही शैक्षिक लाभनिमित्त उपयोग करसकते हैं (UGC के सन्दर्भ में)
7. शोधपत्र, undertaking form तथा प्रयुक्त फोण्ट अनिवार्य रूप से एक Zip फोल्डर में केवल स्वयं के E-mail ID से प्रेषित किया जाय।
8. शोधसार 100 शब्द तथा शोधपत्र की सीमा 1500 शब्द है।
9. प्रेषित किये जाने वाले E mail का Subject अनिवार्य रूप से - 'Title of write up +Your name+Your DOB' हो।

**शोधपत्र कब भेजें-**

लोकार्पण- Jan, Apr, July, Oct तदर्थ तिथि क्रमशः - 1st Dec1st Mar, 1st June, 1st Sep.

**सहयोग राशि क्या है?**

यहपत्रिकाकेवलऔरकेवलसंस्कृतजगत्केउत्कर्षकेलियेसमर्पितहै।साथहीजोअपनीमेधाअभिव्यक्तिहेतुप्लेटफार्मकीतलाशकररहेहैंउनकेप्रोत्साहनकेलियेहै।फिरभीपत्रिकाकोसुचारुरूपसेचलानेकेलियेनेट, सर्वर, सम्पादनआदिमेंजोव्ययकरनाहोताहैउसकेलियेसक्षमपाठकसेअपेक्षितराशि 500/- प्रतिशोधपत्रहै।यहमात्रसाहित्यानुरागःप्रभागकेलियेहै।जोशोधार्थीअथवालेखकउक्तराशिदेनेमेंसक्षमनहींहैंउनकेलियेयहअनिवार्यनहींहै।

जोस्वेच्छयाउक्तराशिसहयोगकेरूपमेंदेनाचाहेंउनकास्वागतहै- {They may deposited in the AC 30260485880 Aditya Kumar Jha SBI Allahabad.}

**शोधपत्र कैसे भेजें?**

E-mail jahnavisanskritjournal@gmail.com

Hard copy-Bipin Kumar Jha
Dpt. Sahitya, Rashtriya Sanskrit Sansthan, Deptt. Of Sahitya
Vedavyas Campus, Balahar, Dist Kangra, Himachal Pradesh 177-108 India

शोधपत्र का प्रारूप क्या हो?

| क्रम | संस्कृत | हिन्दी | आंग्ल |
|---|---|---|---|
| 1 | शीर्षकः | शीर्षक | Title |
| 2 | कूटशब्दाः | कूटशब्द | Key words |
| 3 | शोधसारः | शोधसार | Abstract |
| 4 | शोधः (मुख्यांशः) | शोध (मुख्यांश) | Article |
| 5 | टिप्पणी (पाद-मध्य अथवा अन्त) | टिप्पणी (पाद-मध्य अथवा अन्त) | Foot/mid/end notes |
| 6 | सन्दर्भसूची | सन्दर्भसूची | Bibliography |

**किन शोधों वरीयता दी जाती है?**

1. संस्कृत में निबद्ध
2. शोधप्रविधि अनुपालित
3. समसामयिकसन्दर्भ में उपादेय
4. विज्ञान-प्रौद्योगिकी एवं संस्कृत सन्दर्भित
5. विभन्न विश्वविद्यालयों/संस्थानों में हो रहे शोध की स्थिति/आंकडे/गुणवत्ता हेतु किये जा रहे प्रयास/गुणवत्ता हेतु सम्भावित मार्ग/विविध विषयों की जानकारी प्रभृति विषयक

**सन्दर्भ कैसे लिखें-**

इस निमित्त undertaking form में दिये प्रारूप का अनुगमन करें अथवा APA (American Psychological Association) केनियमोंका अनुगमन करें।





# साहित्यानुरागः

# पुराणेषु वर्णिता शासनव्यवस्था

डा. राम नारायण ठाकुर[3]

---

**कूटशब्दाः-** पुराणं, यास्कः, राजा, मन्त्री, वैदिकसाहित्यम्, व्यासः, कौटिल्यः।

---

**शोधसारः-** *पुराणं नाम पुरातनं किमपि तत्त्वम अस्माकं सनातनसंस्कृतेः परिचायकं वर्त्तते। सामान्यरूपेण यदि पश्यामः, तदा पुराणं किमपि विशिष्टं साहित्यं, यत् प्राचीनकालस्य समाजस्य सर्वाङ्गीणं विवरणं प्रस्तौति। प्रकृतेऽस्मिन् शोधपत्रे पुराणपदस्य विवेचनपुरस्सरं पुराणेषु शासनव्यवस्था सन्दर्भे विशद् रूपे चर्चा कृता अस्ति एतस्याः शासनव्यवस्थायाः वर्णनं पुराणेषु कस्मिन् सन्दर्भे मिलति तत्र किं वैशिष्ट्यम् एतेषांसमेषां चर्चा इह शोधपत्रे प्रस्तूयते।*

---

पुराणशब्दस्य अर्थः यास्केन निरूक्ते स्वमुक्तः – 'पुरा नवं पुराणम्' इति। पुरातनतत्त्वानां नूतनपरिवेशे प्रस्तुतीकरणमिती अस्य तात्पर्यम्। व्याकरणमादाय विश्लेषणं क्रियेत चेत् 'सायंचिरंप्राहेप्रगेव्ययेभ्यष्ट्युट्युलौ तुट् च' इति पाणिनिसूत्रेण ट्युप्रत्ययेन निपातनात् तुडभावेन अयं शब्दः पुरा भवमित्यर्थे साधुः भवति अथवा पुरा नीयते इति पुरोपसर्गपूर्वकात् नीधातोः कथञ्चित् उपपाद्यः। यदपि निर्वचनमस्य स्यात् , प्राचीनतत्त्वावगाहनमेव तेन सूचितं भवति।1

**पुराणसाहित्यस्य भारतीयवाङ्मये महत्त्वम्**

भारतीयः वाङ्मयनिधिः वेदमूलकोऽस्ति इति सर्वविदितं वर्तते। वैदिकसाहित्यसममेव पुराणमपि महत्वशालि वर्तते।2 वेदभागाः संहिता- ब्राह्मण- आरण्यक-उपनिषदः एतन्महत्त्वस्य प्रमाणभूताः सन्ति। तदेव उक्तम्—
'इतिहासपुराणाभ्यां वेदं समुपवृंहयेत्' इति।यज्ञस्य उच्छिष्टात् ऋग्यजुः सामसहितानि एव पुराणानि आविर्भूतानि।इति अथर्वेदसंहितायाम् उल्लिखितम्।3 गोपथब्राह्णेऽपि लिखितं, यत् सर्वे वेदाः कल्प-ब्राह्मण-उपनिषद्-इतिहास-पुराणैः सह प्रकटीभूताः।4
शतपथब्राह्मणे बृहदारण्यके प्रतिपादितं यथा आर्द्रकाष्ठेन उत्पन्नाग्निना पृथग्रूपेण धूमः निष्कृतः भवति, तथैव महाभूतानि:श्वासेन ऋग्वेद-सामवेद-यजुर्वेद-इतिहास पुराणविद्या-उपनिषदः-समाजायन्त।5पुराणानि गच्छता कालेन सामाजिक जनानां भावनानां , संस्काराणां, रीतीनां च अनवरतं परिपोषणे सामर्थ्यम् उपापादयन्। तथा च भारतीयसमाजस्य स्वाभाविकतायाम्, अक्षततयां पुराणसाहित्यस्य योगदानं सर्वातिशायि वर्तते।6 आपौरूषेयवेदानां

[3]सहायक प्रोफेसर- इतिहास राष्ट्रिय संस्कृत संस्थान वेद व्यास परिसर,**बलाहर,** कांगड़ा हि.प्र.





अध्यात्मरहस्यप्रतिपादिकां गहनातीतावगाहिनीम् अपरिचितभाषां पौरूषेयकथाभिः सरलीकृत्य सर्वेभ्यः जनेभ्यः बोधयन्ति। वेदाः न सर्वजनेभ्यः सुलभाः इति 'न स्त्री शूद्रो वेदमधीयाताम्' इत्यादिस्मृतिवाक्येन ज्ञायते।7 सामान्यजनाः विवाहादिसंस्कारावसरेषु वेदविज्ञान् विशिष्टवर्गविदुषः आलम्बन्ते। अपरत्र भागवतादिपुराणानां पारायणं शिक्षाग्रहणं च निम्नवर्गीयाः अपि कुर्वन्ति इति पुराणानां व्यापकत्वं स्पष्टमेव।8

**पुराणपरिचयः** – पुराणोद्भवे सर्वाणि पुराणानि प्रायशः समानमेव तथ्यं वितृव्वन्ति भागवतपुराणानुसारं ऋग्वेदस्य उदयः ब्रह्मणः पूर्वस्मात् मुखात् सञ्जातः। तत्र पुराणानामुत्पतिः चर्तुभ्यः मुखेभ्यः समाने एव समये अभवत्।9 वेदव्यासकृतस्य पुराणशास्त्रस्य आदिः प्रवर्तकः लोमहर्षणः आसीत्। लोमहर्षणस्य षट् शिष्याः एते आसन्-सुमतः, अग्निवर्षा, मित्तवायुः, एते त्रिभिः, स्वेषां संहिताः कृताः, येषां लोमहर्षणस्य संहितया सह साम्यं विद्यते।अस्य उल्लेखः विष्णुपुराणे, अग्निपुराणे चास्ति।पुराणसंहितायाः उद्भवकर्तु महर्षिव्यासस्य वंशपरम्परा एवंरीत्या वर्तते,

व्यासं-वशिष्ठ नप्तारं शक्ते पौत्र कल्मषम, वन्दे पराशरात्मजं वन्दे तपोनिधिम् ।।

वशिष्ठस्य प्रपौत्रः, पराशरस्य पौत्रः तथा शुकदेवस्य पिता व्यासः आसीत्।विष्णुपुराणे व्यासस्य वंशपरम्परा इयमासीत्।10

ब्रह्माः-वसिष्ठः-शक्तिः-पराशरः-व्यासः-शुकदेवः इति।

सर्वेषु पुराणेषु दृष्टविवरणानुसारेण पुराणस्य पञ्च लक्षणानि क्रियन्ते।11
" सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ।।12

तत्र प्राचीनैतिह्यस्य स्वरूपनिर्णये वंशस्य वंशानुचरितस्य च महद् वैशिष्ट्यं तिष्ठति।ब्रह्मणा सृष्टानां राज्ञां सन्तानपरम्परा वंशः सञ्ज्ञायते।13 अपरत्र पूर्वो-क्तवंशोत्पन्नांनां मूलपुरूषाणां महनीयराज्ञां विशिष्टं वर्णनं वंशानुचरितम् उच्यते।14
मनुष्यवंशप्रसूतानां महर्षीणां नृपतीनां चरित्रापेक्षया पुराणेषु राज्ञामेव चरित्रं बाहुल्येन उपलब्धं भवति।पुराणैतिह्ययोः मध्ये भेदः प्राचीनग्रन्थेषु न लभ्यते।15
इतिहासग्रन्थोत्तमं महाभारतमपि पुराणमिति व्यवह्रियते।पुराणस्य अस्तित्वं ब्राह्मणसाहित्ये गोपथशतपथादिषु प्राप्यते।16शुक्रनीते अपि मीमांसातर्क साङ्ख्यवेदान्तयोगादि-परकवर्णने पुराणेतिहासयोः गणना द्वात्रिंशति विद्यासु क्रियते।तदध्ययनं च राज्ञः कृते परमावश्यकं भवति स्म।17अनेन प्रकारेण पुराणस्य माहात्म्यं समृतिकाले सर्व मान्यामासीत्।18
पुराणानां सङ्ख्या अष्टादश इति अग्रिमेण वचनेन ज्ञायते-:
"मद्वयं भद्वयं ब्रत्रयं वचतुष्टयम्।
अनापलिङ्गकूस्कानि पुराणानां पृथक्-पृथक।।19
किञ्च पुराणसाहित्यस्य प्रतिपाद्यविषयस्य उद्येश्यं पर्यालोचयामश्चेद् धर्मस्थापनमेव प्रधानतया प्रधानमुद्येश्यं तिष्ठति।
स च धर्मः एतदग्रिमपद्येन सरलतया बोध्यते।

'अष्टादशपुराणेषु व्यासस्य वचनद्वयम। ।इति।**20**

परोपकार पुण्याय पापाय परपीडनम्। ।' इति।

श्तद्धर्मरूपम उद्यिश्य पुराणेषु राजानुचरितमाध्यमेन तेषां प्रजानुरञ्जकं शासनव्यस्थापनं व्यतन्यत। तदेवास्माभि: आलोच्यते।**21**

**पुराणेषु राजधर्म:** – प्राचीनकाले लघुसमुदायेषु स्थित्वा निवसन्त: मनुष्या: कालान्तरेण अधुना जनसङ्ख्यावृद्धे: सुदीर्घेषु समुदायेषु स्थित्वा जीवनं यापयन्ति। मनुष्याणां समुदाय: परिवार:, ग्राम:, मण्डलं, जनपद:, राज्यं, राष्ट्रमित्यादिनामभि: व्यवहृियते। यथा मृतिकाकणा: स्वातन्त्रयम् आचर्य न घटादिरूपविशेषं प्राप्नुवन्ति, तथैव जना: अपि अशासिता: न समृद्धा: भवन्ति अत: प्रजानुरञ्जक: कश्चित् शासक: जन् समूहस्य प्रवन्धक: अवश्यम्भावितया स्यात्। तस्मादेव पुराणेषु प्रजापालनरूप: राजधर्म: विशिष्टतया विशदीकृतम्।राज्ञ: प्रजानां विषये स्वकर्तव्यानां स्वाधिकाराणां सम्यग् ज्ञानं भवेत्।**22**

मत्स्यपुराणे राजधर्मस्य विशेषरूपेण वर्णनेन सहितं राज्ञां स्थितिरपि बोधिता। सम्पूर्णराज्यं राजानमेकमेव आश्रयते स्म।राज्ञि नष्टे सति सकलराज्यस्य शासनव्यवस्था छिद्यते स्म। अत: राजानं शत्रुभ्य: रक्षितुं विविधा: उपाया: क्रियन्ते स्म।प्रज्ञारक्षणमेव राजधर्म: इति सिद्धान्तम् अनुसृत्य प्रजारक्षणाय सीमाक्षेत्रेषु विभिन्नदुर्गाणां निर्माणं राजनीते: प्रमुखं तत्त्वमासीत्। मत्स्यपुराणे षड्विधा: दुर्गा: उक्ता: – धन्वदुर्ग:, महीदुर्ग:, जलदुर्ग:, वार्क्षदुर्ग:, गिरीदुर्ग:, नरदुर्गश्च।

एतेषु दुर्गेषु शिल्पसामग्री, ओषधय:, दुग्धादिपेया:, भोज्याश्च पदार्था:, तैलानि, इन्धनानि, स्थापयन्ते स्म।

राज्यकर्मचरिगण:– राजकीयकार्याणां नियमनाय व्यवस्थापनाय च राजा विभिन्नान् कर्मचारिण: नियोजयति स्म। वस्तुत: राज्याधिकारिणां नियोजनं राज्यस्य समृद्धौ महत्त्वपूर्णभूमिकां निर्वहति।तत्प्रसङ्गे मत्स्यपुराणे स्पष्टतया सूचितं, यत् राजनिपु राज्ञा नियोजयिष्यमाण: जन: रुपसम्पन्न:, गुणयुक्त:, सज्जन:, क्षमाशील:, सहिष्णु:, उत्साही, धर्मज्ञ:, प्रियवादी च भवेत्।मत्स्यपुराणानुसारेण सेनापति:, इत:, सन्धिविग्रहिक:, देशरक्षित:, धर्मा धिकारी राज्यसभाया: मन्त्रिण: सभासदिति उच्यन्ते स्म।एवञ्च द्वारपाल:, ताम्बूलधारी, वैद्य:, लेखक: इत्यादय: राज्ञ: स्वकीया: भृत्या: आसन्।गजाध्यक्ष:, अश्वाध्यक्ष:, अन्त:पुराध्यक्ष: इत्यादय: सप्त अध्यक्षा: कार्यकारिण्या: मुख्या: अधिकारिण: अभवन्।अद्यापि नामन्तरेण एते एव अधिकारिण: विविधप्रशासनिकपरीक्षाद्वारा राज्यस्य अनेकपदेषु विनियोज्यन्ते।पुराकालेऽपि नृपति: विभिन्नाभि: उपधानामपरीक्षाभि: अधिकारिणां योग्यतां परिमाप्य तान् पदेषु आसादयति स्म।यदि राजा निर्वहनीयानि स्वकर्तव्यानि एतानि विस्मृत्य विलासे निमग्न: भूत्वा कुशासनं भजति स्म, तदा अपरे राजान: तद्राज्यम् आक्रम्य तदधिकुर्वन्ति स्म।अत: एव राजा स्वकर्तव्येषु जागरुक: आसीत्।**23**

राज्ञ: कर्त्तव्यानि–

यथा शतं जनान् नयमानयानस्य चालक: जितेन्द्रिय: स्यात्।तथैव मत्स्यादिपुराणेषु राजा नियतेन्द्रिय: श्रेयस्कर: उक्त:। व्यासस्योल्लेखानुसारं पञ्चेन्द्रियाणि मनश्च वशीकुर्वन राजा जितेन्द्रियो भूत्वा शत्रून् जेतुं समर्थ: भवति।राज्ञा कामक्रोधलोभमोहमदमानरहितेन भाव्यम् , इति मत्स्यपुराणकार:, अग्निपुराणकार:, कामन्दक:, कौटिल्य:, शुक्रचार्यश्च वदन्ति। एतै: कामक्रोधादिषड्रिपुभि: अनेके राजान: नष्टा:।अपरत्र एतान् दोषान्





विहाय परशुराम – अम्बरीष – नागागप्रभृतिभि: जितेन्द्रियै: चिरकालं यावत् पृथ्वीराज्यं भुक्तम् इत्यपि वर्णनं पुराणेषु प्राप्यते।

राजा उद्यमशील स्यादिति कौटिल्यस्य तात्पर्यम्। कामन्दकस्य वचनं, यथा इन्धनस्य आधनेन अग्नि: प्रज्वलित: भवति, तथैव दुर्बलोऽपि पुरूष: उद्योगेन लक्ष्मीं प्राप्नोति। महाभारते बृहस्पति: उद्योगमेव राजर्धमस्य मूलं तत्त्वम् अमन्वत।उद्यम: नाम पुरूषार्थ: इति तस्य अभिप्राय:।मत्स्यपुराणे राज्ञ: गुणा: पशुपक्षिगुणै: समाना: उक्ता: सन्ति।राजा बक इव अर्थचिन्तक:, सिंह इव गुप्त:, मयूर इव विचित्र:, कुक्कर: इव दृढ़भक्त:, कोकिल इव मृदुभाषी, काक इव नित्यशंकित: स्यात्।धर्मसूत्रस्य अनुसारेण राजा प्रजानाम् आजीविकात: षष्ठं भागं गृहीत्वा राज्यं सञ्चालयेत।

याज्ञवल्क्यस्मृतेरनुसारं न्यायपूर्वकं प्रजां पालयन् राजा प्रजानां पुण्यस्य षष्ठं भागं प्राप्नोति।तच्च पुण्यं सर्वेभ्य: पुण्येभ्य: अधिकं भवति।**24**

यू.एन. घोषालमहोदयानुसारं धर्मसूत्रेषु, पुराणेषु स्मृतिग्रन्थेषु मुख्यरुपेण प्रजापालनपरका: त्रय: सिद्धान्ता: परिलक्ष्यन्ते–दैविक:, नैतिक:, अर्द्धसंविदात्मक: इति।तत्र प्रथमानुसारेण: राजा देवानामादेशेन प्रजापालनं स्वीकरोति।द्वितीयानुसारेण राज्ञ: कर्तव्यं तस्य क्षात्रधर्मानुसारि भवति।तस्य मूलं च वेदे द्रष्टुं शक्यते।तृतीयसिद्धान्तानुसारं प्रजाभ्य: बलिग्रहणात् राज्ञ: प्रजापालनं परमावश्यकम्।

स्वामी–अमात्य–जनपद–दण्ड–दुर्ग—कोश–मित्र–रूपाणि उल्लिखन् मत्स्यपुराणकार: राजानमेव राज्यस्य मूलं न्यगदत्। राज्ञा तदतिरिक्तषडङ्गाना रक्षणं कर्तव्यमिति तत: ज्ञातं भवति।

राजनीतितत्त्वेषु दूतव्यवस्थाया: महत्त्वपूर्णं स्थानं वर्तते।अग्निपुराणकार: दूतं राज्ञ: नेत्रम् अवोचत्।दूतरूपनेत्रयुक्त: राजा सुप्त: सन्नपि जागर्ति।प्राचीनकाले इव अद्यापि प्रत्येक राष्ट्रं स्वकीयं राजदूतम् अपरस्मिन् देशे नियोजयति।दूत: यद्यपि परस्य देशस्य गुप्तसूचना: स्वदेशं प्रापयति, तथापि दूत: अवध्य: मत:।रामायणे अस्य प्रमाणम् उपलभ्यते।लंकायां दूतरूपेण गत: हनुमान् रावणेन न हत:।

कुशल: प्रशासक: सर्वदा संकटै: आवृत: अङ्गरक्षकम् अपेक्षते।अङ्गरक्षकविषयकं वर्णनं कुर्वन् मत्स्यपुराणकार: वदति, यद् उन्नताकार:, अल्पनिद्र:, शूर:, दृढ़भक्ति:, धैर्य–वान् , सहिष्णु:, हितैषी च अङ्रक्षक: स्यात्।**26**

अग्निपुराणानुसारेण स्वामिभक्त:, सहिष्णु:, प्रियश्च कश्चित् पुरूष: स्त्री वा ताम्बूलधारिपदे नियोज्या।शत्रुपक्षेण सह समयानुकूलं सन्धिं, विग्रहं वा सम्पादयन् सन्धिविग्रहिक: उच्यते स्म।मत्स्यपुराणानुसारं षाड्गुण्यतत्वानां ज्ञाता, देशीयभाषायां प्रवीण:, नीतिनिपुणश्च जन: सन्धिविग्रहिक: स्यात्।सन्धि–विग्रह–यान–आसन–संश्रय–द्वैधीभाव: आचायै: षाड्गुण्यतत्त्वरूपेण उक्ता: सन्ति।राज्ञ: गमनागमनाय अपेक्ष्यमाण: रथचालक: पुरूष: सारथि: मत्स्यपुराणे एवमाख्यातं, यत् शुभाशुभस्य ज्ञाता, अध्वशिक्षानिपुण:, अश्वसम्बद्धस्य आयुर्वेदस्य वेत्ता, पृथिव्या: समस्तभागस्य विज्ञ:, रथिनां बलाबलस्य सुपरीक्षक:, स्थिरदृष्टि:, प्रियभाषी, शूर:, विद्वान् सारथि: नियोज्य:।

प्रजापालने न केवलम् आर्थिकनीतयः राज्ञा प्रवर्तितव्याः, अपितु सदसन्मार्ग दर्शयितुं धर्म–सम्बद्धाः उपायाः उपेतव्याः।एतदेव वर्णयन् मत्स्यपुराणकर्ता धार्मिकविभागस्य पुरूषाणां गुणान् निगदति।शत्रुमित्रयोः समभावं धारयन्, धर्मशास्त्रे पारङ्गतः, कुलीनः, श्रेष्ठः ब्राह्मणः धर्माधिकारी विधातव्यः।

अथ च मनुष्याणां हृदयस्थभावानाम् अवगामी, दीर्घकायः, निर्लोभी, दानशीलश्च पुरूषः धर्माधिकारी स्यात्।**27**
एवं रीत्या प्रजापालनाय विभिन्नाः नीतीः अनुसरन् राजा न सर्वाः ताः स्मर्तुं क्षमते।अतः कृतानां करिष्यमाणानां च कार्याणां सङ्ग्रहाय लेखकनामा अधिकारी सर्व लिपिबद्धं करोति।

शुक्राचार्यानुसारेण गणनायां कुशलः, देशस्य विविधभाषागतभेदस्य ज्ञाता, संशयरहितः ,अर्थग्रहणे क्षिप्रः, स्पष्टलेखी एव लेखकः भवति।

सूदाध्यक्षः राज्ञः निकटतमः महत्वपूर्णश्च प्राणरक्षकः भवति।राज्ञे प्रदीयमानस्य भोजनस्य सम्यक् परीक्षकः, परेषां वञ्चनाप्रयासैः अचलितकर्तव्यः, पवित्रः, प्रवीणः, ओषधीनां ज्ञाने साधुः सूदाध्यक्षः भवति।राज्ञः सन्निधिं गतेषु अन्यतमस्य वैद्यस्य विषये मत्स्यपुराणे वर्णितं, यत् वंशपरम्परातः अष्टाङ्गचिकित्सां जानन्, परेषां प्रलोभनानि अप्राप्तः, उच्चकुलोत्पन्नः धर्मात्मा जनः वैद्यः नियुज्येत।

राज्यस्य सर्वाः शासनव्यवस्थाः अर्थसाध्याः भवन्ति।तदर्थं अर्थिकव्ययस्य निरीक्षकः धनाध्यक्षः राज्ञा नियुज्यते स्म।मत्स्यपुराणसिद्धान्तः लौह–वस्त्र–मृगचर्म–रत्नादिपरीक्षकः, सदसत्तथ्यानां ज्ञातारं, परेषां प्रलोभनवचनेषु विश्वासम् असमुत्पादयन्तं, पवित्रहृदयं, कुशलं, मदरहितं जनं धनाध्यक्षस्य पदे उपवेशयितुं निर्दिशति।कौटिल्योऽपि धनाधिकारिणः सन्निधाता इति कृतनाम्नः वर्णनम् अर्थशास्त्रे करोति।तदनुसारं सन्निधाता, कोशगृहस्य, पण्यगृहस्य, कोष्ठागारस्य, कुप्यगृहस्य, शास्त्रागारस्य, कारागारस्य च निर्माणं कर्तव्यम्।

वी.एस. अग्रवालमहोदयानुसारेण गजाध्यक्षः, अश्वाध्यक्षः, दुर्गाध्यक्षः, स्थपतिः, अस्त्राचार्यः, अन्तःपुराध्यक्षः, वैद्यश्च सप्त उच्चाधिकारिणः आसन्।तथापि नैते मन्त्रिवर्गे परिगण्यन्ते स्म।

याज्ञवल्क्यानुसारं राजकार्यस्य मुख्यः आधारः मन्त्रः तिष्ठति।राज्ञः कार्याणां सफल्यात् पूर्व न कश्चित् मन्त्रज्ञानं प्राप्तुं शक्नुयात्।कामन्दकस्य वचनं मन्त्रस्य बीजम् अवश्यम्भावितया रक्षितव्य इति बोधयति।बीजस्यास्य प्राकट्येन अभेद्यानि अपि राज्यतन्त्राणि भेद्यानि जायन्ते, गोपनेन च रक्ष्यन्ते।

राज्ञः स्वजनैः मन्त्रिभिः, भृत्यैश्च सह सम्बन्धविषये मत्स्यपुराणे मनुस्मृतौ च स्पष्टं वर्णितं प्राप्यते, यद् अविश्वसनीये जने विश्वासः, विश्वसनीयेऽपि अधिकविश्वासः न कर्तव्यः यतः विश्वासात् समुत्पन्नं भयं मूलमेव नाशयति।शुक्राचार्यः एतद्विषयं स्पष्टीकुर्वन् वदति, यद् विश्वासयोग्याः अपि पुत्रः, भ्राता, स्त्री, अमात्यः, अधिकारिणः एते नात्यन्तविश्वासस्य पात्राणि न सन्ति, यतः सर्वे धनस्त्रीराज्यादिलोभेन स्वभावतः पथभ्रष्टाः भवन्ति।

राजकीयकार्याणां निर्वहनाय अपेक्षितानां भृत्यानां गुणान् वर्णयन्।

अग्निपुराणकारः आख्याति यत् दक्षः, भद्रः, दृढ़ः, शान्तः, क्लेशसहिष्णुः, सन्तोषी, शीलसम्पन्नः, उत्साही च भृत्यः नियोक्तव्यः।कौटिल्यः राज्ञः प्रमादम् अपाकर्तुम उपायं वदति, यद मृगयाद्यूतवैश्यासक्तस्य राज्ञः अनुगामी भूत्वा तस्य चरित्रं प्रशस्य दुर्व्यसनेयः तं व्यावर्तयितुं प्रयत्नः विधेयः।**29**





राज्यप्रशासने दण्डादिनीतितत्त्वम्ः— धर्म, अर्थ, काम, मोक्षरूपाः चत्वारः पुरूषार्थाः मनुष्यजीवनस्य लौकिकालौकिकं प्रयोजनं साधयन्ति।तथैव राजनीतौ साम–दान–दण्ड भेदसञ्ज्ञं नीतिचतुष्टयं विशिष्टं स्थानं बिभ्रत् शासनं सुव्यवस्थाप्य प्रजोपकारि भवति।मत्स्यपुराणे साम–भेद–दान–दण्ड उपेक्षा माया इन्द्रजालाख्याः सप्तप्रयोगाः उल्लिखिताः।अग्निपुराणेन, कामन्दकीयनीतिसारेण एतत् पुष्टं भवति।कौटिल्यः साम–दान दण्डभेदान् चतुरः प्रयोगान् असूचयत्।निर्बलाः राजानः शान्त्या धनप्रदानेन वा, बलवन्तश्च दण्डेन, भेदेन वा वशीकर्तव्याः इत्याख्यानं तत्र प्राप्यते।तथा च शत्रवः सुहृदश्च नियोगविकल्पसमुच्चयादिभिः उपायैः स्वपक्षमानेतव्याः।

स्तुतिप्रशंसाद्वारा कस्यचिद् जनस्य वशीकरणं साम उच्यते।

सत्यप्रशंसा तथ्यसाम, मिथ्या प्रशंसा अतथ्यसाम भवति ।उच्चकुलोत्पन्नः, सरलप्रकृतिः, धार्मिकः, सत्यवादी, विनीतः, सम्माननीयश्च जनः सामद्वारा एव साध्यः भवति।अत्र कौटिलयस्य अयं विचारः वर्तते, यत् शत्रुः राजा येषु अमात्येषु सन्दिह्यति, तेषु कृतः सामप्रयोगः अन्याः सर्वाः नीतीः विफलीकरोति।

दानशब्दः दाधातोः ल्युटप्रत्ययेन उत्पद्यते।अस्यार्थः दानं कृत्वा परस्य जनस्य अधीनीकरणं भवति।भेदश्च संघातीकृतजनानां पृथक्करणमिति ज्ञेयम्।

अस्मिन् संसारे सर्वे प्राणिनः चराचरा स्वतः स्वेषु कार्येषु निमग्नाः भवन्ति।अस्य कारणं दण्डः।तेनैव सर्वे क्रियाशीलाः जायन्ते।इहलोके परलोके वा दण्डशक्तिं धारयत् पुरूषः सर्वेषां पूज्यः तिष्ठति।सर्वेषु कार्येषु शान्तिशीलाः ब्रह्मा, पूषा, अर्यमा तथा पूज्याः न भवन्ति।परं दण्डसक्षमाः रूद्रः, अग्निः, इन्द्रः, सूर्यश्च देवाः सर्वैः पूज्यते।मत्स्यपुराणानुसारेण दण्डः चतुर्विधः भवति वाग्दण्डः, अर्थदण्डः, वधदण्डः।

यदा राजा दण्डनीतेः सम्पूर्णतया प्रयोगं करोति, तदा युगश्रेष्ठं सत्युगं विहितं जायते।यदा सम्यक्तया धर्मेप्रवृत्तो भूत्वा चतुर्थांशं परित्यज्य अंशत्रयमेव प्रयुङ्क्ते, तदा त्रेतायुगं जायते।यदा अर्धांशमेव अनुसरति, तदा द्वापरयुगः।यदा सम्पूर्णदण्डनीतिं परित्यज्य अन्यैः असदुपायैः प्रजां पीडयति, तदा कलियुगं प्रविशति।

शास्त्रमतानुसारेण राज्ञि ईश्वरप्रदत्ता शक्तिः विराजते।मत्स्यपुराणमतेन ब्रह्मा प्राणिनां रक्षार्थं दण्डप्रयोगे देवानामशान् विनियोज्य राजानम् असृजत्।भगवान् मनुरपि राज्ञः देवत्वं समाख्यातवान्।उत्तरवैदिक काले अयं देवत्वसिद्धांतः उत्तरोत्तरं विकासं प्राप्तवान्।वाजपेयराजसूयादियज्ञै राजा प्रजापतिः अभिहितः।शुक्राचार्यः नृपतिं देवतांशसम्पन्नंहू लौकिपुरूषेषु उत्तममच् अभ्यमन्यत।मातृपितृगुरूभातृबन्धुकुबेरयमैः एतैः सप्तभिः युक्तः सन्नेव राजाभिधानाय असौ योग्यतां भजति।

राज्यस्य सप्तांगविवेचनम् — ः राज्यस्य सप्त अङ्गाानि स्वीक्रियन्ते स्वामी, अमात्यः, जनपदः, दुर्गः, दण्डः, कोशः, मित्रश्च।मत्स्याग्निपुराणकाराभ्यां, शुक्राचार्य–याज्ञवल्क्यकौटिल्यकामन्दकमनुप्रभृतिभिः एतेषां वर्णनं विहितम्।शुक्राचार्यमतानुसारेण राज्यरूपशरीरस्य राजा शिरः, मन्त्री नेत्रं, मित्रं कर्ण, कोशः मुखं, बलं मनः, दुर्गः हस्तौ, राष्ट्रं पादौ स्तः।राजा राज्यस्य प्रमुखम अङ्गं वर्तते।तेन तदतिखितानां षण्णामङ्गानां यथाशक्ति रक्षा कर्त व्या। राज्ञा सह सदा वर्तमानः राज्यादिकार्येषु परामर्शं प्रयच्छन् अमात्यः उच्यते।अमात्यमन्त्रिणोः मध्ये यद्यपि साम्यं, तथापि———एतौ भिन्नौ स्वीकृतौ। तदनुसारेण यथोचितं गुणं, देशं, कालञ्च विभाव्य अमात्यः नियोज्यः। राज्ञः प्रमुखानाम् अधिकारिणां तत्तद्विभागाध्यक्षाणां वर्णनं डा. के. पी. जायसवालः एवं रीत्या कृतवान्।

1. अन्तपाल: – सीमाप्रान्तानां प्रधानाधिकारी
2. अन्तर्वंशिक: – राजवंशस्य गृहकार्याणामधिकारी
3. कार्मन्तिक: – रत्नाकराणाम् उत्पादनसंस्थानानाम् अधिकारी
4. दण्डपाल: – सेनानिर्वहनस्य मुख्याधिकारी
5. दुर्गपाल: – शत्रुभ्य: राष्ट्रस्य रक्षक: अधिकारी
6. दौवारिक: – राजप्रासादस्य प्रमुखाधिकारी
7. नायक: – सैनिकानां प्रधानाधिकारी
8. पुरोहित: – स्पष्टम्
9. पौर: – राजधान्या: प्रधानशासक:
10. प्रदेष्टा – राजाज्ञानां प्रचारक:
11. प्रशास्ता – कारागाराणां प्रधानाधिकारी
12. मन्त्री – स्पष्टम्
13. युवराज: – स्पष्टम्
14. सन्निधाता – राजकोशस्य मन्त्री
15. सभ्य: – मन्त्रिपरिषद: अध्यक्ष:
16. समाहर्ता – करविभागस्य मन्त्री
17. सेनापति: – सैन्यविभागस्य मन्त्री

कौटिल्य: एतेषां तिसृषु श्रेणीषु विभागं कृत्वा क्रमश: 48000 पणा:, 24000 पणा:, 12000 पणा: इति वेतनरुपेण निरधारयत्।

अनेन प्रकारेण राज्यस्य शासनप्रणाल्यां तदङ्गानि, तेषु प्रयुक्ता: सामादिनीतय:, गुप्तचरव्यवस्था, राज्याधिकारिणां नियुक्ति:, करव्यवस्था, सैन्यसङ्गठनमित्यादय: विषया: पुराणेषु वर्णिता: सन्ति।

उपसंहार: – 'पुराणेषु वर्णिता शासनव्यवस्था' इत्ययं विषय: आधुनिककाले निश्चितमेव प्रासङ्गिको वर्तते।शासनव्यवस्था समाजस्य विकासाय प्रधान: आधारोऽस्ति।एतदन्तर्भूतानि दण्डनीति:, राजनीति:, अर्थशास्त्रं, राजधर्म:, क्षात्रविद्या एतानि तत्त्वानि भवन्ति।वस्तुत: संतुलितशासनेन धर्मार्थकामरूपा: त्रयो वर्गा: सामाजिकानां जीवने समानतया प्रवर्त–न्ते।राज्यस्य प्रमुखम् अङ्गं राजा विशिष्टगुणै: सम्पन्न:, स्वधर्मे जागरूक: स्यादिति पुराणेषु चर्चितम्।राज्यस्य शासनप्रणाली धर्ममूला, नीतिपरका, कल्याणप्रदा, भ्रष्टाचारमुक्ता, अनुशासनबद्धा, समयानुकूलम् उदारा अनुदारा वा स्यात।व्यवस्थायां शुभाशुभास्य, समत्ववादस्य, न्यायपरकनीतीनां पालनं कर्तव्यम्।अनेन सामाजिकमूल्यानि समाजं समृद्धिपथं नयन्ति।

पाद टिप्पणी: —

1. महाभारत "प्रचलित" पु. प., पृ–3
"पुरार्येषु आनयतीति पुराणम"
2."पुराणं सर्व शास्त्रानां प्रथमं ब्रह्मणास्मृतम"
मत्स्य.पदम.सृ.अष्टा.पु.
पृ.19,अथर्व.71.7.74ऋच.सायनि, 6.7 स पुण्ण यजुषा सह





3.अथर्व, 15.1.6.1
4. गोपथ. ब्रा.2 प्र 1
5.शतपथ 14.6.10 एवं वृहदा. 2.4.10
6.मत्स्य पु., 53.3, श्लो. 36 भागवत 3.12, 39
7.विष्णु पुराण 3.6.17.19 तथा अग्निपुराण 271.11.12
8.भागवत पुराण 12.7.11
9.भागवत पुराण, 12.6.17 विष्णुपुराण, 1.2.25
10.भागवत पुराण, 12.7.16, 12.7.15
11. महा. आदिपर्व, 1.17
12. वायु पुराण, 103.48.51
13. नारदीय पुराण 1.92.21
14.गोपथ ब्राह्मण, 1.10
15.शतपथ ब्राहमण, 13.4.3.13
16 आश्वलायन गृहयसूत्र 3.3.1, 4.6
17.महा.अनुशासनपर्व
18.कौटिल्य, अर्थशास्त्र 5.13.14.5.3
19. गौतम धर्म सूत्र 8.4.6
20 . वही — 11.21
21. याज्ञवलक्य स्मृति 1.45.46.1, 101.3.189
22. शु.नी. 1.49
23. वही ...
24 . म.पु. 215.55
25. म.पु. 320.19.22
26. अ.पु. 93.12.13
27. का.नी. 7.5
28. म.पु. 215.20.21
29. मनु. 7.147
30. शु.नी. 24.25
31. याज्ञवलक्य 1. 367
32. मनु. 9.302
33. म.पु. 216.1
34. शु.नी. 1.77
35. कौ.अ. 5.91.3
36. अ.पु. 95. 19. 22

# The role of Sanskrit in the present curriculum

( with special reference to Vedic Intellectual Tradition)

Dr. Anil Pratap Giri[4]

---


## Abstract[5]

*India has continuous and cumulative intellectual tradition in many domains of knowledge. This tradition has its attested beginning in the □igveda, the first Indo-European document, and continues to be alive in the life, practices and learning of the Indian people. `As a mechanism of transfer and evaluation of ideas from one generation to the next generation, this tradition is comparable to the perennial flow of the river Ga□gā. The Vedic Intellectual Traditional way of learning is of great significance and relevance to modern concepts of education regarding with learning process and Guru-Śi□yaparamparā .Memorization is the main tool of learning process. As Max-Muller has noted (in his India-what can it teach us: Munshiram Manoharlal, Indian Edition, 1991, p.4) that texts in the oral tradition are maintained in memory. "This may sound startling, but what will sound more startling, and it is a fact that can be easily ascertained… at the present moment, if every MS of the □igveda was lost, we should be able to recover the whole of it- from the memory of the srotrias in India….. Here then they are not dealing with theories but with facts which - anybody may verify. The whole of the □igveda, and a great deal exists at the present moment in the oral tradition.P.131. Orality, as a mode of constituting and maintaining knowledge, organizes knowledge in the mind, as against the literate traditions in which knowledge maintained externally. Max-Muller calls those who have memorized the text, Living libraries'p.132*

*The commitment of the Gurus (teachers) to pass on to posterity all they knew was remarkable. They did not consider themselves to be above others and others to be lesser mortals. The □igvedic statement (x, 191, 2-3, 4): not merely Vedic preservation but also self-illumination which was prayed for in the case of both the teacher and taught. (Taittiriyopanisad, II, 1, 1) Vedic intellectual tradition is the follower of oral research culture. This research tradition has continuous flow due to the strong living library which is inherent in the Indian intellectual mind. Deductive methodology is the tools of oral research culture. Memorization, discipline, discourse methods, consecration, meditation, deep reflection chintan and manana are the major instruments of deductive methodology which is followed by General to Particular research attitude and gives the most analytical mind due to the soul which is the base of all the types of knowledge (vi.52.5)*

*This Vedic research attitude and living library is the creator of Vedic sciences and applied sciences. With the help of these tools Indian became Jagatguru.*

*This paper examines the attributes of Vedic intellectual tradition which is totally different to Western intellectual tradition. Western intellectual tradition has created a lot of global*


[4] Assistant Prof. Deptt. Sanskrit.Pondichery University.
[5]Presented in WAVES through skype.





*problems. Today Modern man is well-equipped with worldly comforts, yet his mental environment is lacking peace and He has become the slave of his unrendering desires and lust. The result is that he is always under stress, tension depression etc. Because of which sustainable development (quantitative and qualitative development with social justice) is affected. Vedic wisdom of our ancient seers has contributed very much for the sustainable development of mankind as Hypothetic-deductive methodological learning process, Eco-friendly Gurukula environment, early morning Pātha tradition (re-organized texts in various permutations and combinations in the mind), and bliss. It's our duty to explore the Indian way of thinking which is very essential for sustainable development in the post-modern era. I consistently focused on Vedic knowledge systems and their relevance in India and global situations.*

---

**Keywords:** Tradition, Parampara, Indian knowledge System, The Process of Indian Knowledge System, Vidya, Methodology of knowledge system, Conclusion.

---

**Tradition** is not equivalent to "Parampara" It does not refer to continuous flow. "Tradition" is a western term and in western concept it is not a continuous flow because there is a concept of Dark Age, there is a break after each generation.[6] But,

1. Indian intellectual Tradition did not break like western intellectual tradition. This parampara is like The river Ganga which is flowing from Rigvedic period till present time.[7]
2. The western intellectual tradition was broken after the Latin tradition. This break is called as Dark Age. So the tradition is not parampara and vice versa.
3. Greek literature started from 600 B.C-400A.D. the first intellectual of Greek literature- Pythagoras followed by Homer. This tradition was interrupted after Greek enlightened tradition, known as dark age (400 A.D. - 1200 A.D.)[8]
4. In 1500 B.C. started Vedic period. Veda is the origin point of Indian intellectual **parampara**, which follows oral tradition or Sruti parampara.The poet is the Sadhaka and Yogi in oral tradition.He never became instrument of poetry, but The Greek literature followed written tradition, where the poet is the author and the instrument of poetry.[9]

[6]The Greek Renaissance. Contributors: P. N. Urey - author. Publisher: Methuen & Co. Ltd. Place of Publication: London. Publication Year: 1921. Page Number: v.
[7] Indian knowledge system,kapoor kapil,volume -1.page I
[8]A Modern History. Contributors: Albert Gerard - author. Publisher: University of Michigan Press. Place of Publication: Ann Arbor, MI. Publication Year: 1959. Page Number: i.
[9] Therefore, for Aadi Sankara the arrow maker was the paradigm example of a yogi.

5. Sutras, Slokas, Karikas, mantrs were delivered in oral tradition, which was easy to memorize. Indians followed Guru-Sishya parampara which was stronger than western tradition,their main contribution was school of thought.[10]
6. In western tradition also they followed Guru-Sishya tradition and the pioneer was Socrates followed by Plato, Aristotle & Alex gender who had attacked India in 326 B.C.
7. Western intellectual tradition knowledge has been held as opposed to innocence, and associated with power that leads to the fall of man.[11] But in Indian intellectual tradition knowledge is not exercise of power but power one self, Moksa. Libration of self from its own constrains.[12]
8. Due to oral culture of tradition, text is high degree of complexity. The scholars mind was like library and the speed of information processing was much higher than in the scriptable mode where the information is first transferred to the mind through senses. But lack of documentation our tradition deteriorated. There was also lack of astray, money. Our mind has much larger capacity to store data than the hard disk of a computer.[13]

**Vedic knowledge System-**

Indian knowledge System has major three division as Darsana,Gyana,Vidya which refers to Indian research methodology :-

i) Darsana -(Philosophy) life of wisdom, it is discourse of vidya. This knowledge system leads to liberalization. It is knowledge for Moksha.
ii) Gyana -Gyana(Knowledge) becomes organized and systematized it serves the purpose of teaching is called Vidya.
iii) Vidya (Discipline) - after visualization of ultimate reality, the knowledge comes in a systematized way. Vidya is divided into two categories[14] :

a) Para-vidya - Knowledge of the ultimate principle - Paramatma/Brahma (i.e., metaphysical domain).

b) Apara-vidya - Instrument of para-vidya (without apara-vidya, para-vidya can't be understood). One who qualifies this vidya he would be known - knower-knowable. It is knowledge of the materialistic things and worldly domain. Apara-vidya has two subdivision :-

i) Informative vidya (prefectural theory)
Antarmukhi vidya - Knowledge of internal world - philosophy, literature.

[10] Text of the oral tradition,in kapil kapoor,language.linguistics and literature,the IndIAN perspective,Delhi Academy Foundation,1994,pp.27-30

[11] Man is given, dominion over the fish of the sea, and over the fowl of the air, and over the cattle, and over all the earth.Genesis,1.26

[12] Srimadbhagvad-Gita,18.63

[13] Some reflection on the interpretation of texts in the Indian tradition in structures of signification, ed H.S.Gill,vol.1,Delhi Wiley Eastern limited,1990

[14] Mundakopanisad, I.1.4.





Bahirmukhi Vidya - Knowledge of external world - social sciences, anthropology, international relation, and self realization is the main, while para-vidya has no texts.

ii) Experiential vidya - Sciences and technology

The Process of Indian Knowledge System:

**General process:**

**Means of knowing**

General knowledge




Knower ------------------------------->knowable

(pramata) (prameya)

Background →Science

→Art

→Management

→etc

**Special Process of knowledge system**

Special process :-->Soul-->Intellect-->Mind-->Sense organs--> Things -->(vidya)

Knowable and knowledge→Cosmic mind

→Whole knowledge

→Universalisation

→Metaphysical Knowledge

→Critical and analytical

(Because we have oral tradition)

The difference between soul and intellect is that soul reflects our feelings and intellect reflects reasoning , logic, according to this knowledge system, one will get metaphysical knowledge also knowledge is absolute - ultimate/ cosmic. Methodology of this knowledge is deductive.

**Vidya**

Para-vidya

Apara-vidya

Informative(Science)

Experimental (Applied Science)

18 Major Vidya

→ Antarmukhi information- Literature & Philosophy.

→ Bahirmukhi information- Social sciences.

Para vidya & Apara vidya.

Apara vidya has 4 subsidiary Vedas -

(1) Rig veda - Ayurveda (upved) - medicine.





(2) Yajur veda - Dhanurveda (upved) - weaponry (shastra vidya)
(3) Sama veda - Gandharva veda - music & dance.
(4) Atharva veda - Shilpaveda - Architecture.

**Methodology of knowledge system:**

(Comes from philosophy but applicable in science and arts)

- Inductive methodology
- Deductive methodology

The difference is that Indians have **Deductive methodology** because soul is the base of knowledge. By the Atmapratyaksha (inner self), Indians already get the universal law or theory. So his mind is hypothetic deductive universal law or theory is already inherent in Indian mind due to the Atmapratyaksha. In deductive methodology, they follow the pattern of general to particular. They examine rules, law, or theory. (Western scholars follow inductive methodology). Deductive methodology creates analytical & critical mind which creates Sastrarth Paddhati or Path Paddhati (discourse of knowledge (oral)).

**Inductive methodology** is from particular to general. Universal theory inherent in Indian intellectual minds.

Sastrath Paddhati --> Discourse of knowledge, which is organized or well analyzed in various and combination but orally. They maintained knowledge in the mind. Indian intellectuals don't believe in documenting.

Discourse of knowledge - created research attitude, which created living libraries -living library created oral research culture -oral research culture created oral research civilization - so India was hub of global research and development. It was known for intellectual capital, India was Jagat Guru.

Culture is inherent in our attitude, thoughts, manifestation of culture, It is external civilization. Indian system has oral research culture. Research culture cannot be traded as Indian Intellectual Tradition, but Western Intellectual Tradition can be traded and the output like dissertation, thesis can also be traded. Written research culture is because of our adoption of western intellectual tradition. Oral research culture gives two kinds of output:-

i) Quantitative Research Culture -
Kala - 64 types of art and applied science.
ii) Qualitative Research Culture - secondary and theoretical

Vidya (out) - 18 major vidyas.

**Conclusion:** -To conclude Vedic Intellectual Tradition, Indian thoughts are opposite of western thought .We have an oral culture but westerners have written culture: Indian follow deductive methodology - to believe in universalization - general to particular. Indian thought is from concrete to abstract. It is from materialism to idealism. Indian philosophy is from charvak to Vedanta. It is from Dhvani (phonetics) to Sabda Brahma (word). Founder of Vedanta philosophy is by Vadrayana (Brahma Sutra) and Adi Sankaracharya represented his finding.

**Bibliography:-**


1. Sastry , Chamu Krishna, "Problems of Sanskrit Teaching in India," in D. Prahaladkar, relevance of Sanskrit in the Contemporary World, tirupati, 2001.
2. Gonda, J. , Sanskrit in Indonesia, 2nd edn. , New Delhi, 1973.
3. Pollock, S., "The Cosmopolitan Vernacular," journal of Asian studies, 57, 1998.
4. --- "Indian in the Vernacular Millennium Literary Culture and Policy, 1000-1500," Daedalus , 127.3, 1998b, 1-34.
5. --- "The Sanskrit Cosmopolis 300-1300" and appeared in J.E.M. Houben, ed., The Ideology ans Status of Sanskrit, Leiden, 1996.
6. --- (ed.), Literary Cultures on History: Reconstruction from South Asia, Berkeley: University of California Press, 2003.
7. --- "The Death of Sanskrit," Comparative Studies on History and Society, 43(2), 2001, 392-426.
8. ------1998, Literary Theory : Indian Conceptual framework, Delhi: Affiliated East-West press.
9. ------2000, "Vyāsa Paramparā, Text renewal Mechanisms, Max-Müller and European Scholarship" in Max-Müller and Contemporary European Scholarship, Ramakrishna Mission, Kolkata.
10. -------2002, Knowledge, Individual and Society in Indian Tradition, Chandigarh: Saini Memorial Foundation Lecture, Panjab University , Chandigarh, (monograph).
11. Henneder, J., "On The Death of Sanskrit," Indo Iranian Journal, 45, 2002, 293-310.
12. Meulenbeld , G.J., A History of Indian Medical Literature, 4 parts Groningen, 1999-2000.
13. Kapoor, Kapil, 1994, "Texts of the Oral Tradition," Language, Linguistics and Literature: The Indian Perspective, Delhi, Academic Foundation.
14. Kaviraj, Sudipta, "The Imaginary Institution of India," in Partha Chatterjee and Gyanendra Pande, eds., Subaltern Studies VII, Delhi, 1993.
15. Austin, G., The Indian Constitution: Cornerstone od a Nation, Oxford, 1996.
16. Scharfe, H., Grammatical Literature, Wiesbaden, 1997.






# प्रमाणेषु साक्षिप्रत्यक्षस्य वैशिष्ट्यम्

**Dr.Suman K.S.**[15]

आगमप्रामाण्यं समर्थयद्भिः वेदापौरुषेयत्वं समर्थनीयमेव । वेदानां अपौरुषेयत्वाभावे आगमस्यापि प्रामाण्यं न सिद्ध्यति । यतो हि आगमेषु परस्परविरोधः दृश्यते । परस्परविरुद्धमतानुसारेण बहवः परस्परविरुद्धागमाः वर्तन्ते चेत् आगमेन कस्याप्यर्थस्य सिद्धिर्भवति । वेदस्य अपौरुषेयत्वे तु वेदमूलकत्वं यस्यागमस्यास्ति तेनागमेनैव अर्थसिद्धिर्भवति, प्रमेयसिद्धिर्भवति ।तथैव प्रत्यक्षप्रामाण्यवादिभिरपि साक्षिप्रत्यक्षस्य नियतयथार्थत्वं नियतप्रामाण्यं समर्थनीयमेव । साक्षिप्रत्यक्षस्य नियतयथार्थत्वे सति तादृशसाक्षिसिद्धस्य बाह्यप्रत्यक्षस्य प्रामाण्यं सिद्ध्यति । अन्यथा इदं प्रत्यक्षं प्रमाणं वा तत्प्रत्यक्षं प्रमाणं वेत्याशङ्कायां परिहारः कः ? यथा वा आगमयोः विरोधे सति कस्यचिदागमस्य प्रामाण्यं वेदमूलकतया सिद्ध्यति, तथैव नियतयथार्थभूतेन साक्षिणा यस्य प्रत्यक्षस्य प्रामाण्यं निश्चितं तदेव प्रत्यक्षं प्रमाणमिति निश्चेतुं शक्यते । साक्षिणः नियतयथार्थत्वाभावे साक्षिसिद्धस्य प्रत्यक्षस्यापि प्रामाण्यं न सिद्ध्यति । यथा वा कश्चन पुरुषः सर्वान् प्रति एवं कर्तव्यमेव वर्तितव्यमित्युपदिशति । परन्तु स्वयं सम्यक् नास्ति चेत्, स्वयं सदाचारी न्यायनिष्ठः न भवति चेत् तस्येतरान् प्रत्युदेशाधिकारः नास्ति । तथैव साक्षी तावत् सर्वेषां प्रत्यक्षाणां प्रामाण्यनिश्चायकः । स एव साक्षी नियतयथार्थो न भवति चेत् साक्षिणः प्रत्यक्षप्रामाण्यनिश्चायने सामर्थ्यमेव नास्ति । तस्मात् वेदापौरुषेयत्वं यथा वाऽवश्यं समर्थनीयमागमप्रामाण्यवादिभिः, तथैव साक्षिप्रत्यक्षस्य नियतयाथार्थ्यं समर्थनीयमेव । नियतयथार्थत्वसमर्थनाभावे तस्य साक्षिणः इतरप्रमाणानां प्रामाण्यविषये प्रामाण्यमेव न स्यात् । अपौरुषेयः वेदः नियतयथार्थ इति तन्मूलकस्यागमस्य प्रामाण्यं सिद्ध्यति यथा तथैव साक्षिणः नियतयथार्थत्वे तद्गृहीतस्य प्रत्यक्षस्य प्रामाण्यं सिद्ध्यति । तस्मात् साक्षिणः प्रामाण्यं, नियतयथार्थत्वं समर्थनीयमेव ।

प्रत्यक्षप्रमाणं सर्वैर्दार्शनिकैः लौकिकैः परीक्षकैः आधुनिकविज्ञानिभिश्चाङ्गीक्रियते । तस्य लक्षणे, विभागे, ज्ञानजनकत्वप्रकारे, तज्जन्यज्ञानस्वरूपादिविषये चास्ति महान् मतभेदः । अस्य च मतभेदस्य अस्ति कारणद्वयम् । तत्तन्मतेषु प्रमेयस्वरूपभेदः सर्वविदित एव । तत्तत्प्रमेयसमर्थनाय तदानुगुण्येन प्रमाणस्वरूपनिरूपणं तत्तद्दार्शनिकैः क्रियते । तथा हि - बौद्धैः पदार्थस्य स्वलक्षणमात्रमङ्गीकुर्वद्भिः नामजात्यादिकल्पनाविरहितस्यैव प्रत्यक्षत्वं, कल्पनाविशिष्टग्रहणस्य भ्रान्तित्वमुच्यते । अद्वैतिभिः सर्वस्य चैतन्याधिष्ठानत्वमङ्गीकुर्वद्भिः वृत्त्यवच्छिन्नचैतन्यविषयावच्छिन्नचैतन्ययोः ऐक्यं प्रत्यक्षमित्युच्यते । पुरुषस्य पुष्करपलाशवत् निर्लेपत्वमङ्गीकुर्वद्भिः साङ्ख्यैः 'चिति च्छायापन्ना बुद्धिवृत्तिः प्रत्यक्षम्' इत्युच्यते । एवं स्वस्वप्रमेयानुगुण्येन प्रत्यक्षस्वरूपनिरूपणं दार्शनिकेषु प्रत्यक्षविषये मतभेदे प्रथमं कारणम् ।

द्वितीयङ्कारणन्तु, इन्द्रियार्थसम्बन्धनिरूपणादिप्रक्रियाभेदप्रयुक्तः मतभेदः ।नामजात्यादिधर्माणां प्रत्यक्षेऽवगाहनक्रमनिरूपणभेदप्रयुक्तः मतभेदः । तथा हि – समवायसंबन्धमङ्गीकुर्वद्भिः न्यायवैशेषिकैः संयोगसमवायघटिताः षट् सम्बन्धाः अङ्गीक्रियन्ते । समवायसम्बन्धमङ्गीकुर्वद्भिः भाट्टैः स्वप्रकाशत्वं वा अनुव्यवसायगम्यत्वं वा ज्ञाततानुमेयत्वं वा साक्षिवेद्यत्वं वा इत्यत्र मतभेदः प्रक्रियाभेदरूपः । प्रक्रियाभेदेष्वपि प्रमेयभेदस्पर्शोऽपि तत्र तत्र वर्तत एव । निर्विकल्पकं ज्ञानं प्रत्यक्षमुतानुमेयम् ? किमिदं प्रमा वा भ्रमप्रमाभिन्नं वा

[15] Head, Department of Samskrita,Jain College, Jain University, J.C.Road,Bangalore.

 ISSN 976-8645

ततस्थं वा इत्यादयोऽपि प्रक्रियाविमर्शात्मकाः । एवं प्रमेयभेदानुगुण्यसम्पादनाय प्रक्रियासौष्ठवसम्पादनाय च दार्शनिकेषु प्रत्यक्षप्रमाणविषये मतभेदाः प्रवर्तन्ते ।

द्वैतवेदान्ते निर्दोषार्थेन्द्रियसन्निकर्षः प्रत्यक्षम् । विषयं प्रति स्थितेनाक्षेण ज्ञानोत्पत्त्या अक्षाणामपि कारणत्वेन प्रत्यक्षत्वं सम्मतम् । तथा च टीकाकृत्पादः जयतीर्थभिक्षुः प्रमाणलक्षणटीकायाम् – 'अर्थं प्रति स्थितमक्षरं प्रत्यक्षम्' इति । चक्षुरादिपञ्चेन्द्रियाणि मनश्च जॅअनेन्द्रियाणीति प्रायः सर्वदार्शनिकसम्मतानि । द्वैतवेदान्ते तु सप्तमं ज्ञानेन्द्रियं संलक्षितम् । तदेव साक्षी । तथा च श्रीमध्वाचार्यवचनं प्रमाणलक्षणे– 'प्रत्यक्षं सप्तविधं साक्षिषडिन्द्रियभेदेन' इति । अयञ्च साक्षी प्रमाता आत्मैव । आत्मस्वरूपम्, अन्तःकरणधर्माश्च सुखादयः, बाह्याश्चाकाशकालादयोऽस्य साक्षिणो विषयाः ॥

## मुख्यविषयप्रतिपादनम्

इन्द्रियं द्विविधम् । प्रमातृस्वरूपं तद्भिन्नञ्चेति । तत्र स्वरूपेन्द्रियं साक्षीत्युच्यते । आत्मा एव आन्तरपदार्थद्रष्टृत्वात् साक्षीत्युच्यते । स च ज्ञानरूपः स्वप्रकाशश्च । तस्य आत्मस्वरूपं मनः आत्मधर्मभूताश्च आन्तरा ज्ञानेच्छाप्रयत्नसुखदुःखभयाभयकृपाऽविद्यादयः तदभावाश्च विषयाः । एवं बाह्याः आकाशकालद्व्यणुकपरमाणुप्रकृत्यादयोऽपि साक्षीन्द्रियग्राह्याः ।
यद्यपि न्यायमते इव 'मन एव सुखादिकं गृह्णाति इति वक्तुं पार्येत' यदि स्वरूपेन्द्रियभिन्नैरिन्द्रियैः जायमानं ज्ञानं प्रमात्मकमेव भवेत किन्तु तत् भ्रमात्मकमपि दरीदृश्यते । एवञ्च ज्ञानेन्द्रियाणां भ्रमजनकत्वात् ज्ञानमात्रे प्रामाण्यसन्देहः सुस्थ एव । न हि सुखदुःखादिविषये कदाचिदपि विभ्रममनुभवामः । तेन च ज्ञायते इदं च ज्ञानं न विभ्रमजनकेन्द्रियजन्यमिति । विभ्रमाऽजनकञ्च इन्द्रियं साक्षिरूपमेव नान्यत् इत्युक्तम् **अनुव्याख्याने**–

'स च साक्षी क्वचिद्दुष्टः कथं निर्णय ईयते । विशेषास्सर्व एवैते साक्षिप्रत्यक्षगोचराः ॥
तस्मात् सर्वप्रसिद्धस्य व्यवहारस्य सिद्धये । साक्षी निर्दोष एवैकः सदाऽङ्गीकार्य एव नः ॥'

किञ्च अनुभूतपदार्थविषयकं कदाचिदपि अभ्रमरूपम् सुखदुःखादिविषयकं ज्ञानं सर्वेषामस्तीति सुविदितम् । इदञ्च निर्णयात्मकम् ज्ञानं साक्षीन्द्रियग्राह्यमित्युच्यते । भिन्नेन्द्रियजन्यज्ञानप्रामाण्ये अनाश्वासपरिहाराय पुनः प्रमाणान्तरान्वेषणेन अनवस्थादिदोषसद्भावेऽपि साक्षीणः स्वप्रकाशत्वेन स्वस्य तत्प्रामाण्यस्य च तेनैव ग्रहणाङ्गीकारेण न अनवस्थादिदोषप्रसक्तिः । तदेव प्रतिपादयति आचार्यः जयतीर्थमुनिः **विषमपदवाक्यार्थविवृतौ**–

'नियमेन सुखाद्येषु प्रामाण्यं साक्षिगोचरम् । स्वपामाण्यं सदा साक्षी पश्यत्येव सुनिश्चयात् ॥
ज्ञानस्य ग्राहकेणैव साक्षिणा मानतामितेः । दोषाभावे प्रमाणत्वं दोषाभावस्य साक्षिणा ॥
निश्चितत्वं क्वचिच्चैव स्वतः प्रामाण्यमिष्यते । अतो न सर्वमानानां प्रामाण्यं निश्चितं भवेत् ॥
साक्षिणा निश्चितं यत्र तत्प्रामाण्यं स्वलक्षणम् ॥'

तथा च साक्षिणः स्वप्रकाशत्वेन स्वस्य स्वगृहीतज्ञानस्य च प्रामाण्यग्रहणे संवादानपेक्षात् न अनवस्थादिदोषाः । अविज्ञाते अननुभूते च पदार्थे साक्षी प्रामाण्यं न गृह्णाति दोषाभावे एव प्रमाणम् इति व्यवस्थया प्रवर्तते । प्रामाण्यग्रहणे साक्षिणः स्वारसिकशक्तिसद्भावेन दोषाभावस्य प्रयोजकत्वमात्रम् अभ्युपगम्यते । साक्षी ज्ञानमात्रं गृहीत्वा पश्चात् क्वचित् जिज्ञासायां सत्यां परीक्षया ज्ञानप्रामाण्यं गृह्णातीत्यनङ्गीकारे सर्वेषामपि



 ISSN 976-8645

ज्ञानानां प्रथममेव प्रामाण्यं विज्ञायेत । न च एतदानुभाविकम् । तेन उक्तैव व्यवस्था युक्ता । साक्षिणः प्रामाण्यग्रहणस्वभाववत्वेन क्वचिदपि कस्यचिदपि सुखदुःखानुभवादौ न संशयो जातः । बाह्येऽननुभूतेऽर्थे तु व्यवस्थया प्रामाण्यग्रहणमित्युक्तम् ।

ननु साक्षिवेद्यत्वेऽपि अनवस्था दुर्वारैव । ज्ञानग्राहकः साक्षी ज्ञाने प्रामाण्यं गृह्णाति । तत्प्रामाण्यमपि प्रमाणान्तरेण प्रसाधनीयम् । एवं तत्रापि, इति अप्रामाणिकपरम्पराकल्पनातः अन्वस्था कथं परिह्रियते इति चेत् – अत्रोच्यते – साक्षी हि स्वयंप्रकाशः स्वात्मानं स्वप्रामाण्यञ्च गोचरयतीत्युक्तम् । अतोऽत्र प्रामाण्यपरतस्ववाद इव नाप्रामाणिकपरम्पराकल्पनमिति भावेनोक्तम् अनुव्याख्याने –

**'न परीक्षानवस्था स्यात् साक्षिसिद्धे त्वसंशयात्'** इति ।

## साक्षिणः काल-तत्सम्बन्धिपदार्थग्राहित्वम्

सर्वेषां वर्तत एव अनागतादिकालज्ञानम् । अन्यथा कथं लिङन्तलृङन्तपदानामवबोधः ? मुक्तो भविष्यामीति विश्वासेन हि साधकोऽध्ययनाध्यापनादौ प्रवृत्तो भवति । उत्तरकालज्ञानाभावे कथं तद्भमोक्षज्ञानं भवेत् ? एवञ्च सुविदितमिदं यत् सर्वेषामतीतानागतकालज्ञानमस्तीति । तस्य चानुभवः न प्रमाणान्तरगोचर इति साक्षिगोचर एव भवेत् । पदानां पदार्थेषु शक्तिग्रहस्तावत् सर्वापेक्षितः । तेन विना वाक्यैः पदार्थसंसर्गविशेषलक्षणवाक्यार्थस्य बोधासंभवात् । शक्तिग्रहश्च शक्तिविषयपदार्थबोधमपेक्षते । सम्बन्धज्ञानस्य सम्बन्धिज्ञानपूर्वकत्वनियमात् । एषश्च पदार्थग्रहः प्रमाणान्तरादेव भवेत् । न तु पदादेव ।पदात् पदार्थबोधे जाते सम्बन्धिज्ञानस्य जातत्वेन तत्र वाचकत्वशक्तिग्रहः, शक्तिग्रहे सति पदात् पदार्थबोधः इत्यन्योन्याश्रयप्रसङ्गात् । यत्र च अतीतानागतार्थसंसर्गो वाक्यार्थः तत्र अतीतानागतार्थग्रहणमावश्यकम् । इदञ्च ग्रहणं साक्षिणा एव भवेत् न तु मानान्तरेण । सुखकालाकाशादिग्राहकप्रमाणत्वेन सिद्धस्य साक्षिणः एतत्सामर्थ्यकल्पनं सुकरम् । साक्षिणमनङ्गीकुर्वतां तु अतीतानागतार्थग्रहणोपायः एव नास्ति इति पदार्थशक्तिग्रहः दुरुपपादः स्यात् ।

अनुमानस्य व्याप्तिः पक्षधर्मता इति द्वयं सामर्थ्यं ननु । ततश्च अतीतानागतवर्तमानेषु सर्वेषु धूमादिषु तथाविधैः सर्वैः वह्न्यादिभिः व्याप्तिर्ग्राह्यैव । तदर्थं च अतीतादिसकलधूमवह्न्यादीनां ज्ञानं पूर्वं भवेदेव । प्रसिद्धं चक्षुरादिप्रमाणं तु तज्ज्ञान्तपादनेऽसमर्थमिति सर्वसम्मतम् । तथा च साक्षिण एव अतीतादिसकलधूमवह्न्यादिज्ञानजनकत्वमङ्गीकर्तव्यम् । अन्यथा अनुमानप्रमाणस्यैव भङ्गः स्यात् ।
किञ्चास्ति तावत् सर्वेषां सर्व इति शब्दस्य शक्तिग्रहः । अन्यथा 'सर्वं खल्विदं ब्रह्म' इत्यादि व्यवहारविलोपप्रसङ्गात् । शब्दशक्तिग्रहश्चार्थग्रापेक्ष इति सर्वेषां सामान्यतः सर्वपदार्थज्ञानमस्तीत्यङ्गीकार्यम् । अतीतादिसर्वगोचरं च न साक्षीतरं प्रमाणमस्तीति साक्षिण एव सामान्यतः सर्वपदार्थग्रहजनकत्वमङ्गीकर्तव्यम् ।
यथोक्तम् –

**'अतः सर्वे पदार्थाश्च सामान्यात् सक्षिगोचराः ।**
**सर्वमित्येव विज्ञानं सर्वेषां कथमन्यथा ॥'** { अनुव्याख्याने ३-२-१-७८ }
सुदृढनिर्णयस्वरूपस्य साक्षिणोऽनङ्गीकारे ज्ञानेषु अनाश्वासपरिहारोपायाभावेन अनवस्थादिदोषप्रसक्तेः , कदाप्यनाश्वासाऽविषयकस्य सुखादिविषयकजन्यज्ञानस्य प्रामाण्यं साक्षिवेद्यमित्येव वाच्यम् । किञ्च अस्ति तावत् सर्वेषाम् 'एतावन्तं कालमहं सुखमस्वाप्सम्' इति सुषुप्त्युत्तरकालीनानुस्मृतिः । न चेयं स्मृतिः अनुभवमन्तरोपपद्यते । न च सुषुप्तिदशायां सुखाज्ञानकालग्राहकमान्तरं मनो जागर्ति । तदुपरमस्यैव सुषुप्तित्वात्

।एवञ्च सुखकालाज्ञानादिग्राहकं किमपि इन्द्रियं स्वरूपभूतमङ्गीकर्तव्यमेव, यदभावे सौषुप्तिकानुस्मृतिर्नोपपद्यते । तच्चेन्द्रियं स्वरूपभूतं स्वप्रकाशं साक्षिशब्दव्यपदेश्यमिति युक्तमुत्पश्यामः ।

यथोक्तं –

'सुषुप्तौ हीन्द्रियाणामुपरतत्वान्न बाह्यप्रत्यक्षानुमानागमानां तत्र प्रवृत्तिः। अस्ति तदाऽपि कालप्रतिभासः। 'एतावन्तं कालं सुखमहमस्वाप्सम्' इति सुषुप्त्युत्थितस्य परामर्शदर्शनात्। न ह्यननुभूतस्य परामर्शो युज्यते, अतिप्रसङ्गात्। अतः परिशेषात्साक्षिवेद्य एवेति गम्यते।'इति ॥

एवञ्च एतादृशं बहूपकारिणं बहुविप्लवपरिहारिणं साक्षिणं लक्षितवता पूर्णप्रज्ञदर्शनेन तत्वबुभुत्सोर्लोकस्य महाननुग्रहः कृत इति अलं पल्लवतल्लजकल्पानल्पजल्पनेन ॥

## परामृष्टग्रन्थाः


1. प्रमाणलक्षणम् – श्रीपूर्णप्रज्ञमुनिकृतम्
2. अनुव्याख्यानम् - श्रीपूर्णप्रज्ञमुनिकृतम्
3. प्रमाणलक्षणटीका - श्रीजयतीर्थभिक्षुविरचितम्
4. विषमपदवाक्यार्थविवृतिः – श्रीजयतीर्थभिक्षुविरचितम्
5. भारतीयदर्शनेषु प्रत्यक्षम् – पूर्णप्रज्ञसंशोधनमन्दिरम्
6. ज्ञानस्वरूपम् – पूर्णप्रज्ञसंशोधनमन्दिरम्
7. प्रमाणपद्धतिः – श्रीजयतीर्थभिक्षुविरचितम्
8. विष्णुतत्वविनिर्णयः – श्रीपूर्णप्रज्ञमुनिकृतम्
9. प्रमाणलक्षणटीकाटिप्पणी – श्रीविजयीन्द्रतीर्थविरचितम्






# कुन्तकस्य दृक्कोणतः नैषधीयशब्दानां शुद्धिसमीक्षा

साधनकुमार□ात्रः[16]

दशमशताब्द्यां समुद्भूतः प्रसिद्धः आलङ्कारिकः विद्यते कुन्तकाचार्यः । वक्रोक्तिजीवितमिति स्वकीये ग्रन्थे वक्रोक्तिरेव काव्यजीवितमिति अभिमतं तेन प्रतिस्थापितम् । वक्रोक्तौ एव गुरुत्वम् आरोपयता अनेन आचार्येण काव्यस्वरूपं सुविस्तृतं ग्रन्थे आलोचितम् । शब्दार्थौ सहितौ काव्यमित्यादिरूपेण काव्यस्वरूपं निर्दिश्य नवमकारिकायां तस्य वचनम् --"शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि ।"( वक्रोक्ति.- १/९) । कवेः विवक्षितार्थं न सर्वेऽपि शब्दाः प्रकाशयन्ति । येन शब्देन कविचित्तस्य अभिप्रेतोऽर्थः प्रकाश्यते कुन्तकमतेन स एव काव्यशब्दरूपेण परिगण्यते। तथाहि बहुविधेषु समजातीयेषु समार्थकेषु च शब्देषु विद्यमानेष्वपि कविविवक्षितमर्थं विशेषतो बोधयितुं यः शब्दः समर्थः स एव काव्यसम्बद्धशब्दतया परिगण्यते, नान्यः । जगति बहवः शब्दाः सन्ति ये एकमेव अर्थं प्रकाशयन्ति । किन्तु सर्वेऽपि शब्दाः कवेः अभिप्रेतार्थं न प्रकाशयन्ति । कविप्रतिभया काव्यसम्बद्धशब्दाः तस्य सकाशमागच्छन्ति । कुन्तकाचार्येण व्याख्यातं यद् यत्र विशेषात्मना वस्तु प्रतिपादयितुमभिमतं तत्र विशेषाभिधायकमेवाभिधानं निबध्नन्ति कवयः । यथा --

**"द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः ।<br>कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी॥"**

अत्र परमेश्वरवाचकशब्दसहस्रसम्भवेऽपि कपालिन इति वीभत्स-रसालम्बनविभाववाचकः शब्दो जुगुप्साऽऽस्पदत्वेन प्रयुज्यमानः कामपि वाचकवक्रतां विदधाति ।

### नैषधचरितमहाकाव्ये आचार्येण कुन्तकमतानुसारेण श्रीहर्ष-प्रयुक्तानां काव्ये प्रयुक्तशब्दानां सार्थकता विचारः-

अधुना नैषधचरितमहाकाव्ये आचार्येण कुन्तकमतानुसारेण श्रीहर्ष-प्रयुक्तानां काव्ये प्रयुक्तशब्दानां सार्थकता विचार्यते ।

अनलः (३/७७) :

**" साधु त्वयाऽतर्कि तदेकमेव स्वेनानलं यत् किल संश्रयिष्ये ।<br>विनामुना स्वात्मनि तु प्रहर्तुं मृषागिरं त्वां नृपतौ न कर्तुम् ॥"**

अस्मिन् श्लोके हंसेन सह कथोपकथनकाले दमयन्ती वदति - यदि नलं न लभे तर्हि आत्महत्यामेव कर्तुमहमनलम् आश्रयामि । किन्तु नलराजस्य समीपे तं (हंसम्) मिथ्यावादिनम् अनलं ( नलभिन्नं युवानम् ) न संश्रयामि । अत्र अग्निवाचकेषु अग्नि-वैश्वानर-वह्नीत्यादिषु शब्देषु 'अनलः' शब्दः कवेः अभिप्रेतार्थं प्रकाशयति ।

[16]सहायकाध्या□कः, कोलकाता

आशापतिः (८/७१) :

**“ अग्न्याहिता नित्यमुपासते यां देदीप्यमानां तनुमष्टमूर्त्तेः ।**
**आशापतिस्ते दमयन्ति ! सोऽपि स्मरेण दासीभवितुं न्यदेशि ॥”**

साग्निकगणोऽष्टमूर्त्तेः महादेवस्य अग्निरुपां मूर्त्तिं नित्यम् उपासते । हे दमयन्ति! काणदेवेन सोऽपि दिक्पालोऽग्निः तव दासी भव,इत्यादिष्टः। अग्निः सर्वदिशोऽधिपतिः । अत्र अग्नेः महिमामयरूपस्य अभिद्योतनार्थं कविना अग्निवाचकेषु शब्देषु ‘आशापतिः’ शब्दो व्यवहृतः।

ऋभुक्षा (५/७३) :

**“ किं विधेयमधुनेति विमुग्धं स्वानुगाननमवेक्ष्य ऋभुक्षाः ।**
**शंसति स्म कपटे पटुरुच्चैर्वञ्चनं समभिलष्य नलस्य ॥”**

दमयन्ती नले वृते सति यदा यमाग्निवरुणा ‘अधुना किं कर्त्तव्यम्’ इति विषये निर्णयासमर्थाः तदा कपटाचरणे निपुण इन्द्रो नलं प्रतारयितुमिच्छति । यो देवानामग्रे गच्छति स ऋभुक्षा । अत्र देवराज इन्द्रो देवानामग्रे गच्छतीति अर्थे इन्द्रवाचकेषु शब्देषु कविना ‘ऋभुक्षा’ शब्दो व्यवहृतः ।

कालसारः (६/१९) :

**“अन्तःपुरे विस्तृतवागुरोऽपि वालावलीनां वलितैर्गुणौघैः ।**
**न कालसारं हरिणं तदक्षिद्वन्द्वं प्रभुर्वद्धुमभून्मनोभूः ।”**

मृगानां कालसारः श्रेष्ठः । कालः कृष्णवर्णः सारस्तारारूपः श्रेष्ठभागो यस्य तत् कालसारं तदेव च कालसारनामकम् । अत्र नलस्य नयनयोः द्वौ मणी घनकृष्णार्थं , स नलः श्रेष्ठ इति अभिप्रेतार्थप्रकाशार्थं कविना ‘कालसारः’ शब्दो व्यवहृतः ।

काव्यः (१०/५९) :

**“नाकेऽपि दीव्यत्तमदिव्यवाचि वचःस्रगाचार्यकवित्कविर्यः ।**
**दैतेयनीतेः पथि सार्थवाहः काव्यः स काव्येन सभामभाणीत् ॥”**

यत्र संस्कृतभाषा अतिशयेन शोभमाना तस्मिन् स्वर्गालोकेऽपि यो वाक्यमालायां विषये अध्यापकतां वेत्ति यश्च कविरिति प्रसिद्धो यश्च असुराणां नीतिकौशलस्य पथि उपदेशेन सङ्गी आसीत् स शुक्राचार्यः स्वयम्वरसभायामागम्य काव्येन अवर्णयत् । अत्र कविना शुक्राचार्यस्य वाचि निष्णातत्वं प्रकाशनार्थं शुक्रवाचकेषु शब्देषु ‘काव्यः’ ( कु + इन् + यञ् = काव्यः ) शब्दो व्यवहृतः ।

कैतकम् (१/७८) :





**“विनिद्रपत्रालिगतालिकैतवान् मृगाङ्कचूडामणिवर्जनार्जितम् ।**
**दधानमाशासु चरिष्णु दुर्यशः स कौतुकी तत्र ददर्श कैतकम् ॥”**

उद्यानदर्शने कौतुकी स नलः तत्र विलासोद्याने प्रस्फुटितं केतकीपुष्पम् अपश्यत् । इदं केतकीपुष्पं कामोद्दीपकम् । सम्भवतो विरहिणो नलस्य अन्तरे कामपीडावर्द्धनार्थं कविनाऽत्राभिप्रेतः ‘कैतक’-शब्दो व्यवहृतः।

गोत्रशत्रुः (१४/५९) :

**“ गोत्रानुकूलत्वभवे विवाहे तत्प्रातिकूल्यादिव गोत्रशत्रुः । ”**

‘न समानगोत्रां न समानप्रवरां भार्यां विन्देत मातृतस्त्वापञ्चमात् पितृतस्त्वासप्तमात्’ इत्यादिस्मृतेर्वरकन्ययोः परस्परभिन्नगोत्रत्वमेवात्र गोत्रानुकूलत्वम् । तेन सम्भवपरे दमयन्तीपरिणये स्वर्गादागच्छन् गोत्रस्य पर्वतस्य कूलस्य च शत्रुरिन्द्रः, तस्य विवाहस्य प्रतिकूलताचरणमुद्दिश्यैव । तथा च इन्द्रेण सह दमयन्त्या विवाहसम्भवे गोत्रभेदो वर्तते । तस्मात् कारणाद् इन्द्रो गोत्रशत्रुः । अर्थमिमं प्रतिपादनाय कविना इन्द्रवाचकेषु शब्देषु अभिप्रेतो ‘गोत्रशत्रुः’ गृहीतः ।

चण्डीशः (८/३३) :

**“ चण्डीशचण्डाक्षिहुताशकुण्डे जुहाव यन्मन्दिरमिन्द्रियाणाम् ।”**

कामदेवो महादेवस्य तृतीयनयनात्मके अग्निकुण्डे स्वशरीरं विसृजति स्म । ‘चण्ड’-शब्दस्य अर्थः क्रोधः । ‘चण्डीश’-शब्दो महादेवस्य भयङ्करताया द्योतकः। अत्र इममभिप्रेतार्थं प्रकाशनाय कविना शिववाचकेषु शब्देषु ‘चण्डीशः’ शब्दो व्यवहृतः ।

त्रिनेत्रः (१/६) :

**“ दिगीशवृन्दांशविभूतिरीशिता दिशां स कामप्रसभावरोधिनीम् ।**
**बभार शास्त्राणि दृशं द्वयाधिकां निजत्रिनेत्रावतरत्ववोधिकाम् ॥”**

अत्र महादेववाचकेषु शम्भु-ईश-पशुपत्यादिषु शब्देषु ‘त्रिनेत्रः’ शब्दः कवेः अभिप्रेतार्थं प्रकाशयति । राजा नलः महादेवस्य अवतार आसीत् । राज्ञो नलस्यापि द्वे नयने ततोऽधिकं तृतीयमेकमपरं नयनमासीत् । तद्धि नलस्य प्रखरं शास्त्रज्ञानम् । अनेन शास्त्रचक्षुषा नलः स्वेच्छाचारमरुद्धत । अर्थमिमं प्रतिपादनाय कविना ‘त्रिनेत्रः’ शब्दो गृहीतः ।

पतङ्गः (१२/४६) :

**“ पतत्येतत्तेजोहुतभुजि कदाचिद् यदि तदा**
**पतङ्गः स्यादङ्गीकृततमपतङ्गापदुदयः ।”**

एतस्य नेपालराजस्य तेज एव अग्निस्तस्मिन् यदि कदाचित् पतति, तदा स पतङ्गः सर्वथा अङ्गीकृतः , पतङ्गस्य शलभस्य विपत्प्राप्तिर्येन स तथाविधः स्यात् । अत्र कविना काव्यस्य चमत्कारित्वमुत्पादनाय सूर्यवाचकेषु शब्देषु पतङ्गः शब्दो व्यवहृतः । अत्र पतङ्ग-शब्दस्य अपर एकः अर्थः शलभः ।

पलाशः (१/८४) :

**" स्मरार्धचन्द्रेषुनिभे क्रशीयसां स्फुटे पलाशेऽध्वजुषाम्पलाशनात् ।**
**स वृन्तमालोकत खण्डमन्वितं वियोगिहृत्खण्डिनि कालखण्डजम् ॥"**

उद्याने प्रविश्य नलेन कामदेवस्य अर्धचन्द्राकारबाणवत् पलाशपुष्पं दृष्टम्। पलम् अश्नाति यः स एव पलाशः - इति पलाशशब्दस्य व्युत्पत्तिः । पलाशोऽयं विरहिणां मांसं भक्षयति अर्थाद् विरहिणां शरीरं विरहातिशयेन विदग्धं करोति। अत्र पलाशपुष्पदर्शनेन नलस्य विरहातिशयवर्द्धनार्थं कविना अभिप्रेतः 'पलाश'-शब्दः प्रयुक्तः ।

महारथः (१/६१) :

**" महारथस्याध्वनि चक्रवर्त्तिनः परानपेक्षोद्वहनाद् यशःसितम् ।"**

महान् रथो यस्य स महारथः । " आत्मानं सारथिञ्चाश्वं रक्षन् युध्येत यो नरः। स महारथसंज्ञः स्यादित्याहुर्नीतिकोविदाः ॥"(जीवातुटीका) अत्र राज्ञो नलस्य वीरत्वं सर्वातिशायित्वञ्च प्रकाशार्थं महारथः शब्दः कविना अभिप्रेतः ।

माक्षिकम् (९/१७) :

**"हृदाभिनन्द्य प्रतिबन्ध्यनुत्तरः प्रियागिरः सस्मितमाह स स्म ताम् ।**
**वदामि वामाक्षि ! परेषु मा क्षिप स्वमीदृशं माक्षिकमाक्षिपद्वचः ॥"**

नलो मनसा प्रियाया दमयन्त्या वाक्यानि युक्तियुक्ततया प्रशस्य, प्रदर्शिताया बाधाया विषये अनुत्तरः सन् दमयन्तीं सस्मितमाह -- हे वामाक्षि ! माधुर्यातिरेकेण तिरस्कुर्वद् ईदृशं वाक्यं परेषु मा क्षिप । ईदृशं दमयन्त्या मधुरं वाक्यमनायासेन माक्षिकाणां गुञ्जनं पराजयते। अत्र दमयन्तीवाक्यस्य मधुरताप्रकाशार्थं कविना अभिप्रेतो 'माक्षिकम्' इत्ययं शब्दो गृहीतः ।

रस (१/३) :

**" पवित्रमत्रातनुते जगद् युगे स्मृता रसक्षालनयेव तत्कथा ।**
**कथं न सा मद्गिरमाविलामपि स्वसेविनीमेव पवित्रयिष्यति ॥ "**

कलियुगे नलस्य नाम स्मरणेन जगत् पवित्रं भवति । मलिनवस्त्रादयो यदा रसेन (जलेन) प्रक्षाल्य निर्मलीभवन्ति , तदा कविवर्णना दोषयुक्तं भूत्वाऽपि नलकथाश्रितेन शृङ्गारादिरसेन मार्जनेन जगदिदं पवित्रं भवति। अत्र नलस्य गुणकीर्त्तिरूपा वाङ्निर्मितिः शृङ्गारादिरसेन पवित्रतां लप्स्यते , इति अभिप्रेतार्थस्य प्रकाशार्थं कविना जलवाचकेषु अप्-वारि-सलिल-इत्यादिषु शब्देषु 'रसः' शब्दः प्रयुक्तः ।

वामा (१४/३१) :





**" करे विधृत्येश्वरया गिरां सा पान्था पथीन्द्रस्य कृता विहस्य ।**
**वामेति नामैव वभाज सार्धं पुरन्ध्रिसाधारणसंविभागम् ॥"**

यदा वाग्देवी विहस्य दमयन्तीं हस्ते विधृत्य इन्द्रं निकषा गच्छति तदा दमयन्त्याः स्त्रीवाचको 'वामा'-शब्दः सार्थको भवति । वामा शब्दस्य अर्थः स्त्रीलोकः, अपि च वामा शब्दस्य अर्थो वक्रा विरूपस्वभावविशिष्टा वा । अस्मिन् स्थाने दमयन्त्या विरूपस्वभावत्वं वामानाम्न आक्षरिकार्थेन स्पष्टीक्रियते। अर्थमिमं प्रतिपादनाय कविना स्त्रीवाचकेषु शब्देषु अभिप्रेतो 'वामा' शब्दः प्रयुक्तः ।

शूली (८/६४) :

**" "पिकस्य वाङ्माकृताद्व्यलीकान्न स प्रभुर्नन्दति नन्दनेऽपि ।**
**बालस्य चूडाशशिनोऽपराधान्नाराधनं शीलति शूलिनोऽपि ॥""**

अत्रोच्यते यद् देवराज इन्द्रः कोकिलस्य रवेण पीडितः सन् उद्यानेऽपि आनन्दं नानुभवतीति । तथा शिवस्य मस्तकस्थचन्द्रः सन्तापं जनयति । अनेन कारणेन देवराज इन्द्रः शिवस्यापि नित्यं पूजनं न विदधाति । अत्र 'शूली' शब्दः शिवस्य उग्रताया द्योतकः । अनेन कारणेन कविना शिवस्य उग्ररूपप्रकाशार्थं शिववाचकेषु शब्देषु 'शूली' शब्दो व्यवहृतः ।

सरस्वती (९/४) :

**"अदृश्यमाना क्वचिदीक्षिता क्वचिम्ममानुयोगे भवतः सरस्वती ।**
**क्वचित् प्रकाशां क्वचिदस्फुटार्णसं सरस्वतीं जेतुमनाः सरस्वतीम् ॥"**

सरस्वती नदी कुत्रापि स्वच्छसलिला स्वरुपेण च प्रकाशिता , अपि कुत्रापि अन्तःसलिला अदृश्यमाना च । दमयन्त्याः प्रश्नस्योत्तरे दूती नलाय यथार्थमोत्तरं न प्रदाय कुत्रापि स्पष्टरूपेण कुत्रापि वा अस्पष्टरूपेण वदति । अत्र नलस्य वाक्यं सरस्वत्या नद्या सह तुल्यते । नलवाक्यस्य स्पष्टास्पष्टाभावं प्रकाशार्थं 'सरस्वती' शब्दः कवेः विवक्षितार्थं प्रकाशयति ।

सारणी (९/१५४) :

**"इतीयमालेख्यगतेऽपि वीक्षिते त्वयि स्मरव्रीडसमस्ययानया ।**
**पदे पदे मौनमयान्तरीपिणी प्रवर्तिता सारघसारसारणी ।।"**

अत्रोच्यते यद् दमयन्त्या इयमवस्था मधुरसस्य स्वल्पतोया नदी । अस्या नद्या एकाधारे सीमाहीनः कामोऽन्याधारे च अन्तहीनाया लज्जायाः प्रवाहः । नदीवद् दमयन्त्या मौनभाव इव प्रेमस्रोतकामस्य लज्जायाश्च मध्यवर्त्ती द्वीपः । अभिप्रेतः अयमर्थः कवेर्वस्तुतस्तस्मात् क्षुद्रनदीरूपेण नदीवाचकेषु शब्देषु कविना 'सारणी'-शब्दो व्यवहृतः ।

स्मरारिः (११/११२) :

**"काशी भवोत्तरणधर्मतरिः स्मरारेः ।"**

महादेवस्य काशी संसारसमुद्रोर्त्तीणाय तरणिः । अत्र कामनायाः विनाशकरूपेण कविना महादेववाचकेषु शब्देषु अभिप्रेतार्थप्रकाशार्थं 'स्मरारिः' शब्दः प्रयुक्तः ।

अनेन प्रकारेण कुन्तकस्य दृक्कोणतो नैषधीयस्थानां कतिचन शब्दानां पर्यालोचना कृता । कुन्तकाचार्यस्य मतेन एते शब्दाः काव्यप्रयुक्तशब्दरूपेण परिगणिताः। वामनाचार्येण काव्यप्रयुक्तशब्दानिमान् ' शब्दपाक ' इति कथ्यते –

"यत्पदानि त्यजन्त्येव परिवृत्तिसहिष्णुताम् ।

**तं शब्दन्यासनिष्णाताः शब्दपाकं प्रचक्षते ॥"(का. सू. -१/३/१५ वृत्तिः) ॥**

आनन्दवर्धनेनापि काव्ये प्रयुक्तशब्दस्य अर्थस्य च विषये स्वाभिमतं प्रकाशितम् । यथा --

**" "उक्त्यन्तरेणाशक्यं यत्तच्चारुत्वं प्रकाशयन् ।**

**शब्दो व्यञ्जकतां विभ्रद् ध्वन्युक्तेर्विषयी भवेत् ॥"(ध्वन्यालोकः - १/**

## Bibliography


1. Ācārya, Nārāyana(Ed.), *Naiṣadhacarita of Śrīharṣa,* Bombay : Nirṇayasāgar Press, 1952.

2. Dāsa, Karuṇāsindhu(Ed.), *Saṃskṛta Sāhityasambhāra* (Caturdaśa Khaṇḍa ), Kolkata : Navapatra Prakāśana, 1982.

3. De, S. K. ,*History of Sanskrit Poetics*, Culcutta : Firma KLM Private Limited, 1976.

4. Pāṭhaka, Jagannātha(Ed.), *Dhvanyāloka of Ānandavardhana,* Vārāṇasī : Coukhambā Vidyābhavana, 1965.

5. Bandopādhyāya, Raviśaṅkara(Ed.), *Bakroktijīvita of Kuntaka,* Kolkata : Sanskrit Pustaka Bhandar, 2009.

6. Basu, Anilacandra (Ed.), *Kāvyālaṅkārasūtravṛtti of Vāmana,*Kolkata : Sanskrit Book Depot, 1970.

7. Siddhāntavāgīśa, Haridāsa(Ed.), *Naiṣadhacarita of Śrīharṣa*(1-11), Nakipur, 1849.

8. Siddhāntavāgīśa, Haridāsa(Ed.), *Naiṣadhacarita of Śrīharṣa*(12-22), Kolkata, 1871.


# वक्रोक्तिध्वनिप्रस्थानयोस्तुलना – एका समीक्षा





**डा. हीरालालदाशः**[17]

संस्कृतवाङ्मये साहित्यशास्त्रे काव्यात्मनः निरूपणप्रसङ्गे षड्सम्प्रदायाः प्रमुखाः समभूवन् । तर्हि तत्र काव्यस्यात्मा कः इत्यस्मिन् विषये एवालङ्कारिकाणां मतान्तराणि परिलक्ष्यन्ते काव्यालङ्कारजगति । किमिदं तादृशं वस्तु विद्यते यद् विद्यमाने काव्ये काव्यत्वं तिष्ठति तद्रहिते च तदपसरतीति जिज्ञासया स्वस्वबुद्ध्यनुसारेण प्रमुखाः षट् सम्प्रदायाः अभूवन्। भरतमुनितः प्रभृति अद्यावधि विभिन्नशदाब्दीषु नूतनाः सम्प्रदायाः समागताः। अलङ्कारसर्वस्वटीकाकर्त्रा समुद्रबन्धेनोक्तं यत् –

इह विशिष्टौ शब्दार्थौ काव्यम्। तयोश्च वैशिष्ट्यं धर्ममुखेन व्यापारमुखेन व्यङ्ग्यमुखेन वेति त्रयः पक्षाः । आद्येऽप्लङ्कारतो गुणतो वेति द्वैविध्यम् । द्वितीयेऽपि भणितिवैचित्र्येण भोगकृत्वेन वेति द्वैविध्यम् इति पञ्चसु पक्षेस्वाद्य उद्भटादिभिरङ्गीकृतः, द्वितीयो वामनेन, तृतीयो वक्रोक्तिजीवितकारेण , चतुर्थो भट्टनायकेन पञ्चम आनन्दवर्धनेन।

**वक्रोक्तिध्वनितत्त्वयोः परिकल्पना**

विद्यमानेषु तेषु प्रमुखेषु षड्सम्प्रदायेषु वक्रोक्तिप्रस्थानस्य प्रतिष्टापको राजानकः कुन्तकाचार्यः। वक्रोक्तितत्त्वस्य प्रारम्भः कुन्तकेन प्रप्रथमं न कृतः । भामहेन काव्यालङ्कारे वक्रोक्तितत्त्वस्य स्थापना कृता । उक्तं हि यथा –

**सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते ।**

**यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना ।।** [1]

ध्वनिप्रस्थानस्य प्रतिष्टापकः आचार्यः आनन्दवर्धनः। तेन ध्वन्यालोके ध्वनिमेव काव्यात्मरूपेण मनसि निधाय प्रतिपादितं " काव्यस्यात्मा ध्वनिः " इति। तयोरुभयोरपि आलङ्कारिकयोः चिन्तनस्य क्वचित् साम्यं परिलक्ष्यते । आनन्दवर्धनस्य यद् ध्वनिप्रस्थानं तस्यैव प्रभावः वक्रोक्तिप्रस्थाने प्रतिफलति । वक्रोक्तिसम्प्रदायस्य जन्म प्रत्युत्तररूपेणाभवत्। अर्थात् काव्यस्य ये ये भेदाः सौन्दर्यतत्त्वानि च आनन्दवर्धनेन ध्वनिना व्याख्यानं कृतवान् तत्सर्वमपि कुन्तकेन स्वबुद्ध्या वक्रोक्तेः भेदरूपेण अङ्गीकृतम् । एवमेव वक्रोक्तिः प्रायः ध्वनेः वस्तुगतपरिकल्पना इति विचारे नातिशयोक्तिः वर्तते ।

**वक्रोक्तिध्वन्योः लक्षणानि**

[17]Assistant Professor in Sahitya, Dept. of Sanskrit, SCSVMV University, Enathur, Kanchipuram - 631561 Tamilnadu

ध्वनिरिति पदस्य पञ्च अर्थाः सम्भवन्ति । ते यथा – शब्दः, अर्थः, व्यङ्ग्यार्थः, व्यञ्जनाव्यापारः, काव्यम् इति । अनेन अलङ्कारशास्त्रे ध्वनिपदस्य वैशिष्ट्यं ज्ञातुं शक्यते । अत्र व्युत्पत्तिस्तु इत्थं क्रियते –

1. ध्वनति ध्वनयति वा यः सः व्यञ्जकशब्दः ध्वनिः ।
2. ध्वनति ध्वनयति वा यः सः व्यञ्जकोऽर्थः ध्वनिः ।
3. ध्वन्यते इति ध्वनिः, अनेन व्यङ्ग्यार्थः ।
4. ध्वन्यते अनेनेति ध्वनिः – व्यञ्जनाव्यापारः ।
5. ध्वन्यते अस्मिन्निति ध्वनिः – काव्यम् इति ।

एतेषाम् अर्थानां व्युत्पत्तिरपि ध्वन्यालोके प्रथमोद्योते ध्वनिकारिकानन्तरं लोचनटीकायां सुस्पष्टं परिलक्ष्यते । तथा हि –"अर्थो वा शब्दो वा, व्यापरो वा, अर्थोऽपि वा वाच्यो वा ध्वनयति इति शब्दो-ऽप्येवम् । व्यङ्ग्यो वा ध्वन्यते इति व्यापारो वा शब्दार्थयोर्ध्वननमिति । कारिकया तु प्राधान्येन समुदाय एव काव्यरूपो मुख्यतया ध्वनिरिति प्रतिपादितम् ।[2]

कुन्तकाचार्यस्तु वक्रोक्तिजीविते वक्रोक्तेः स्वरूपं निरूप्य तत् सुसमीचीनं व्याख्यानं कृतवान् । तस्याः लक्षणं तत्र उक्तं यथा

**उभावेतावलङ्कार्यो तयोः पुनरलङ्कृतिः ।**

**वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरूच्यते ।।** [3]

कुन्तकाचार्यः वक्रोक्तितत्त्वस्य व्याख्यानमपि प्रथमोन्मेषे सुस्पष्टशब्देनाकरोत् । तद्यथा –

1. प्रसिद्धाभिधानव्यतिरेकिणी । [4]
2. शास्त्रादिप्रसिद्धशब्दार्थोपनिबन्धव्यतिरेकिणी ।[5]
3. प्रसिद्धप्रस्थानव्यतिरेकिणी ।6
4. भङ्गीभणितिवैचित्र्यम्।7

अनेन स्पष्टं ज्ञायते यत् वर्णनशैली द्विधा विभक्तुं शक्या । प्रथमं तु लोकशास्त्रदीसामान्यार्थेन युक्ता अपरं तु लोकशास्त्रदिसामान्यार्थात् भिन्नः लोकोत्तरचमत्कारी । लोकोत्तरचमत्कारकारी वर्णनशैली एव वक्रोक्तिः कथ्यते । तादृशी वर्णनशैली यत्र भवति तदेव काव्यमिति काव्यलक्षणनिरूपणप्रसङ्गे राजानकः कुन्तकाचार्यः एतदेव स्पष्टयति ।

**वक्रोक्तिध्वनिलक्षणयोः स्वरूपगतसाम्यता**

आनन्दवर्धनस्य ध्वन्यालोके ध्वनेः लक्षणं भेदाश्च कुन्तकस्य केषुचित् लक्षणेषु भेदेषु साम्यं परिलक्ष्यते । अत्र दृष्टान्तरूपेण सर्वादौ आनन्दवर्धनस्य ध्वनितत्त्वं समालोच्यते । यत्रार्थ आत्मानं शब्दश्च स्वार्थमुपसर्जनीकृतौ काव्यविशेषं व्यङ्क्तः सः ध्वनिरिति सूरिभिः कथितः । उक्तं यथा प्रथमोद्योते –





**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।**

**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ।।** [8]

कारिकायामस्यां "तमर्थम् " इति पदे सोऽर्थः कीदृश इति व्याख्यातुं पुनः कथयति आनन्दवर्धनः–

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।**

**यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ।।** [9]

प्रतीयमानं पुन अन्यदेव वस्तु अस्ति यत् रमणीनां प्रसिद्धावयवेभ्योः मुखनेत्रश्रोत्रादिभ्यः पृथग्रूपेण लावण्यमिव प्रकाशते । अर्थात् यथा ह्यङ्गनासु लावण्यं पृथङ्निर्वण्यमानं निखिलावयवातिरेकि किमप्यन्यदेव सहृदयलोचनामृतं तत्त्वान्तरं तद्वदेव सोऽर्थ इत्यर्थः ।

ध्वनिरिति शब्दस्य तात्पर्यं परिष्कुर्वन् आनन्दवर्धनः कथयति यत् रसस्वभावरूपः सः स्वादुः अर्थप्रवाहं कुर्वन् महाकवीनां वाणीसु प्रतिभाविशेषं परिस्फुरयति । येनात्र विचित्र कविपरम्परावाहिनीसंसारे कालिदासप्रभृतयः द्वित्राः पञ्चषा वा महाकवयः गण्यन्ते । उक्तं हि –

**सरस्वती स्वादु तदर्थवस्तु निः स्यन्दमाना महतां कवीनाम् ।**

**अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम् ।।** [10]

अत एव विशिष्टार्थोऽयम् अलौकिकप्रतिभाजन्यः, स्वादुः, वाच्याद्भिन्नः किमपि विचित्रवस्तु तथा प्रतीयमानमेव भवति । एवमेव ध्वनेः प्रतीयमानस्य च यल्लक्षणं स्वरूपं वा प्रतिपादितं तेषां कुन्तकस्य वक्रोक्तेः परिभाषया सह क्वचित् साम्यं परिदृश्यते ।

**कुन्तकवक्रोक्तेः परिभाषा**

चमत्कारिकथनस्य प्रकार एव वक्रोक्तिः नाम्नाभिहितो भवति । "वक्रोक्तिः प्रसिद्धाभिधानव्यतिरेकिणो विचित्र्यैवाभिधा वैदग्ध्यं कविकर्मकौशलं तस्य भङ्गी विच्छित्तिः।"[11] इत्यत्र प्रसिद्धकथनाद्भिन्ना इत्यस्याभिप्रायः। 1.शास्त्रादिषु उपनिबद्धशब्दार्थयोः सामान्यप्रयोगाद्भिन्नः। 2. प्रचलितसामान्यसरण्याः अतिक्रम्य वर्णनम् इति। अर्थात् साधारणवर्णनादतिरिच्य किमपि वर्णनम्।

इत्यनयोः व्यवहारयोः तुलनात्मकपरीक्षणेन ध्वनिवक्रोक्त्योः साम्यं सहजबोध्यं भवति। तत्कथमिति अधस्तान्निरूप्यते –

1. ध्वनिवक्रोक्तिपरिभाषयोः प्रसिद्धावाच्यार्थः वाचकशब्दात् अतिक्रमणं करोति । उक्तं हि आनन्दवर्धनेन ध्वनिलक्षणे । अर्थात् यत्रार्थः निजस्वरूपं शब्दश्च स्वार्थं गौणं कृत्वा काव्यविशेषम् अभिव्यनक्ति तत्र ध्वनिरिति आनन्दवर्धनस्याशयः । एतदेव कुन्तकदिशा "शास्त्रादिप्रसिद्धशब्दार्थोपनिबन्धव्यतिरेकि" इत्यनेन रूपेण ज्ञायते । अर्थात् शास्त्रादिषु

उपनिबद्धयोः शब्दार्थयोः प्रसिद्धः अर्थात् सामान्यप्रयोगाद्भिन्नः इत्यर्थः । एवमेव ध्वनिवक्रोक्तिश्च उभावपि असाधारणविवक्षायाः रूपौ भवतः ।

2. ध्वनिवक्रोक्तौ च उभयत्र वैचित्र्योत्पत्तेः समानं रूपं दृश्यते । तदेव आनन्दवर्धनेन "अन्यदेव वस्तु " इति नाम्ना कुन्तकेन च " विचित्राभिधा " इति नाम्ना व्याख्यातम् ।
3. आनन्दवर्धनः कुन्तकश्च वैचित्र्यसिद्धेः तत्तद् तत्त्वमलौकिकप्रतिभाजन्यमिति आमनति । परन्तु उभयोः काव्यतत्त्वयोः मूलदृष्टौ ईषद्भेदः दृश्यते । ध्वनेः वैचित्र्यमर्थरूपात् आत्मपरकं भवति । परन्तु वक्रोक्तेः वैचित्र्यम् अभिधारूपात् (उक्तिरूपात्) मूलतः वस्तुपरको भवति । एवं च वक्रोक्तिः प्रायः ध्वनेः वस्तुपरकपरिकल्पना एव इति वक्तुं शक्यते ।

**वक्रोक्तिध्वन्योः भेदेषु साम्यम्**

स्वरूपापेक्षया वक्रोक्तिध्वनितत्त्वयोः विविधभेदेष्वपि साम्यं परिदृश्यते । यथा आनन्दवर्धनः ध्वनेः एकैकमपि अंशं (भेदं वा) विचिन्त्य ध्वनिप्रस्थानस्य व्यापकत्वमङ्गीचकार। तद्वत् कुन्तकाचार्योऽपि वक्रोक्तेः सर्वानपि अवयवान् निरूप्य तस्याः वक्रोक्तेः व्यापकत्वं स्वीचकार। एवमेव वक्रोक्तिध्वन्योः स्पष्टरूपेण सहव्याप्तिः वर्तते। ध्वनेः चमत्कारस्याश्रयभूतः यथा – सुप्, तिङ्, वचनं, कारकं, कृत्, तद्धितः, समासः, उपसर्गः, कालः, लिङ्गम्, अलङ्कारः, वस्तु, प्रबन्धः, निपातः, रचनादयः। वक्रोक्तेरपि विस्तार एवमेव पदपूर्वार्धवक्रतायाः भेदेषु यथा – रूढिः, पर्यायः, उपचारः, विशेषणं, संवृतिः, वृत्तिः (समासः), लिङ्गं, भावः, क्रिया तथा च पदपरार्धवक्रतायाः भेदेषु यथा – कालः, कारकं, पुरुषः, संख्या, उपग्रहादिषु भेदेषु दृष्टुं शक्यते। अपि च कुन्तकस्य प्रकरणप्रबन्धोऽपि द्वे वक्रते ध्वनौ साम्यं भजते ।

ध्वनिवक्रोक्त्योः भेदानां तुलनात्मकमध्ययनं यदि क्रियते तर्हि उभयोः साम्यं द्रष्टुं शक्यते । वक्रोक्तेः प्रथमप्रकारः वर्णविन्यासवक्रता । तस्याः वक्रतायाः वर्णचंत्कारप्रयोगदृष्ट्या बहवः विच्छित्तिविशेषाः सन्ति । उक्तं यथा द्वितीयोन्मेषे वक्रोक्तिजीविते

**एको द्वौ बहवो वर्णाः बध्यमानाः पुनः पुनः ।**

**स्वल्पान्तरास्त्रिधा सोक्ता वर्णविन्यासवक्रता ।। 12**

एकस्य द्वयोः बहूनां वा व्यञ्जनानां यत्र पुनः पुनः आवृत्तिं वर्ण्यते तथा च वर्गस्यान्तिमवर्णेन सह तद्वर्गीयवर्णानामावृत्तिः, सरेफद्वयोः वर्णयोरावृत्तिः,स्वराणां व्यवधानेन अव्यवधानेन च आवृत्तिः इत्येतानि वर्णविन्यासस्य चमत्काररूपाणि भवन्ति । एतदपि आनन्दवर्धनेन वर्णध्वनिः अथवा रचनाध्वनिरूपेण अङ्गीकृतम्। उक्तं हि ध्वन्यालोके

**यस्त्वलक्ष्यक्रमव्यङ्ग्यो ध्वनिर्वर्णपदादिषु ।**

**वाक्ये संघटनायां च प्रबन्धोपि दीप्यते ।। 13**

**पदपूर्वार्धवक्रता ध्वनिश्च**





पदपूर्वार्धवक्रतायाः नव भेदास्सन्ति । तेषु प्रायः अधिकांशाः ध्वनितत्त्वस्य विविधरूपेषु अन्तर्भवन्ति । अथवा ध्वनेः रूपान्तराणि एव तानि रूढि-पर्याय-उपचार-विशेषणादीनि पदपूर्वार्धवक्रतायाः भेदरूपाणि । आनन्तवर्धनस्य अर्थान्तरसंक्रमितवाच्यध्वनेः यदुदाहरणं तदेव कुन्तकस्य रूढिवैचित्र्यवक्रतायाः भवति । वक्रोक्तिजीविते आनन्दवर्धनस्य ध्वन्यालोकस्य उदाहरणानि वक्रोक्त्युदाहरणरीपेण दत्तानि कुन्तकेन। तद्यथा –

**कामं सन्तुदृढं कठोरहृदयो रामोऽस्मि सर्वं सहे।**

**वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव।। 14**

इत्यत्र रामशब्दः। एतदेव आनन्दवर्धने अविवक्षितवाच्यस्य प्रथमभेदस्य अर्थान्तरसंक्रमितवाच्यध्वनेः उदाहरणरूपेणोपस्थापितः। तथा च कुन्तकेन पदपूर्वार्धवक्रतायाः प्रथमभेदरूपायाः रूढिवैचित्र्यवक्रतायाः उदाहरणरूपेण। कुन्तकस्य पर्यायवक्रता आनन्दवर्धनस्य पर्यायध्वनेः रूपान्तरमात्रं भवति। पारिभाषिकशब्देन तदेव शब्दशक्तिमूलनानुरणनरूपव्यङ्ग्यपदध्वनिः इत्युच्यते। स्वयमेव कुन्तकेन तथ्यमिदं वक्रोक्तिजीविते द्वितीयद्योन्मेषे स्पष्टीकृतम्। उक्तं हि तेन –

**एष एव शब्दशक्तिमूला अनुरणनरूपव्यङ्ग्यस्य पदध्वनेर्विषयः।15**

**पदपरार्धवक्रता ध्वनिश्च**

पदपरार्धवक्रोक्तेः ये भेदास्सन्ति तदपि आनन्दवर्धनेन स्पष्टीकृतम्। वृत्तिवैचित्र्यादयः भेदाः समासध्वनेः तुल्यं भजते। उक्तं यथा तृतयोद्योते –

**सुप्तिङ्वचनसम्बन्धैस्तथा कारकशक्तिभिः ।**

**कृत्तद्धितसमासैश्च द्योत्योऽलक्ष्यक्रमः क्वचित् ।। 16**

ध्वन्यालोकस्य अस्यां कारिकायां येषां कृत्तद्धितसमामध्वनीनां विवरणं वर्तते तत् सर्वमपि वृत्तिवैचित्र्यवक्रता, वचनवक्रता, कारकवक्रतादिभिः चर्चिताः कुन्तकेन। तत्र लिङ्गस्य यद्यपि उल्लेखः आनन्दवर्धनेन पृथक् रूपेण न कृतः तेन लिङ्गस्य चमत्कारविषये स आलङ्कारिकः परिचितः आसीदिति वक्तुं न शक्यते। कारिकायां 'च' इति कथनेन निपातोपसर्गकालादीनां व्यञ्जनमपि आनन्दवर्धनेन स्वयमेव स्वीकृतम्। उक्तं यथा तेन –

**च शब्दादन्निपातोपसर्गकालादिभिः प्रयुक्तैरभिव्यज्यमानो दृश्यते ।17**

एतदर्थम् आनन्दवर्धनेन प्रस्तुतमेकम् उदाहरणम् । तद्यथा

**न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः**

**सोप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः ।**

**धिक्धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा**

**स्वर्गग्रामटिका विलुण्ठनवृथोच्छूनैर्किमेभिर्भुजैः ।। 18**

**वाक्यवक्रता अलङ्कारध्वनिश्च**

पदसमूहः वाक्यम् । योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः वाक्यम् । कुन्तकाचार्यस्य मतानुसारं वाक्यवक्रतायाम् अर्थालङ्काराः प्रायः सर्वेऽपि अन्तर्भवन्ति । उक्तं यथा वाक्यवक्रतास्वरूपनिरूपणप्रसङ्गे

वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा ।

यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति ।। 19

वाच्येनाश्रितानाम् अर्थालङ्काराणां सौन्दर्यं चु निश्चयेन अलङ्कारध्वनेः विषयाः न सन्ति । परन्तु कुन्तकाचार्यः रूपकं , व्यतिरेकादीन् कांश्चन अलङ्कारान् प्रतीयमानरूपेण स्वीचकार । कुन्तकस्य प्रतीयमानरूपकम् आनन्दवर्धनस्य रूपकध्वनिनाम्ना ज्ञायते । तत्र उभयोरपि प्रतीयमानरूपक – रूपकध्वनेः एकमेवोदाहरणं प्रदत्तम् ध्वन्यालोके वक्रोक्तिजीविते च । तद्यथा

**लावण्यकान्तिपरिपूरितदिङ्मुखेऽस्मिन्**
**स्मेरेऽधुना तव मुखे तरलायताक्षि ।**
**क्षोभं यदेति न मनागपि तेन मन्ये**
**सुव्यक्तमेव जलराशिरयं पयोधेः ।।**

उदाहरणेऽस्मिन् असंलक्ष्यक्रमव्यङ्ग्यरूपकस्याश्रयेण काव्यस्य चारुत्वं व्यवस्थितं भवति। अत एवात्र रूपकध्वनेर्व्यवहारः (नामकरणं वा ) समुचितो भवतीति आनन्दवर्धनः । कुन्तकदृष्ट्या तु अत्र प्रतीयमानरूपकम् ।

**प्रबन्धवक्रता प्रबन्धद्वनिश्च**

कुन्तकस्य प्रबन्धवक्रता प्रकृतरूपेण प्रबन्धकौशलरूपा इति वक्तुं शक्यते। परन्तु यदि समष्टिरूपेण विचार्यते तर्हि प्रबन्धवक्रता आनन्धवर्धनस्य प्रबन्धध्वनितः अभिन्ना भवति। तत्र वक्रोक्तिजीविते कुन्तकेन सुस्पष्टमुक्तं यत् केनापि महाकविना विरचितं रामकथामूलकनाटकादिषु पञ्चवक्रताभिः वर्णविन्यासादिभिः सुन्दरं सहृदयाह्लादकारित्वंच वर्णयितुं शक्यते। उक्तं हि कुन्तकेन कथाभागस्य वर्णनं समानरूपेण भवति चेदपि स्वगुणैः काव्यनाटकादिषु प्रबन्धः पृथक् पृथक् भवति यथा प्राणयुक्तशरीरेषु प्राणाः समानरूपेण स्थितेसति स्वगुणैः तत्र भेदं परिलक्ष्यते। तथा हि-





कथोन्मेषसमानेऽपि वपुषीव निजैर्गुणैः ।

प्रबन्धाः प्राणिनः इव प्रभासन्ते पृथक् पृथक् ॥[20]

एवमेव नूतनोपायैः सिद्धः, नीतिमार्गोपदेशैश्च महाकवीनां सर्वेषु प्रबन्धेषु वक्रता अथवा सौन्धर्यं अवश्यं भवत्येव। उक्तं हि कुन्तकेन चतुर्थोन्मेषे-

नूतनोपायनिष्पन्ननयवर्त्मोपदेशिनाम्।

महाकविप्रबन्धानां सर्वेषामस्ति वक्रता ।।[21]

एवञ्च प्रबन्धवक्रतायाः स्वरूपं यत्र प्रतिभाशालिनः कवयः स्वकाव्येषु उपजीव्य कथायाः भिन्नः रसपरिपाकं विधाय तत्काव्यस्य सदा नूतनत्वमानयन्ति। एतत्तु प्रबन्धध्वनितः भिन्नः विषयः अस्तीति वक्तुं न शक्यते। अर्थात् कुन्तकस्य प्रबन्धवक्रता एव आनन्धपर्धनस्य प्रबन्धध्वनिरिति। यथो हि अन्ततः काव्यसौन्धर्यदृष्ट्या प्रबन्धध्वनिरेव रसरूपैव भवति। अतः रसपरिवर्तनस्यार्थः प्रबन्धध्वनेः परिवर्तमेव।

**उपसंहारः**

*एवमेव विविधप्रमाणैः ध्वनिप्रस्थानयोः वक्रोक्तिप्रस्थानेन सह विशिष्टः कश्चन सम्बन्ध अस्तीति प्रमाणयितुं शक्यते । यदि सूक्ष्मातिसूक्ष्मं ध्वन्यालोकस्य वक्रोक्तिजीवितस्य चाध्ययनं कुर्मस्तिर्हि तत्र उभयोरपि आलङ्कारिकयोः साम्यचिन्तनस्य किमपि स्वरूपं द्रष्टुं शक्नुमः । यतोहि ध्वन्यालोके विविधकाव्यत्त्वप्रतिपादनावसरे यानि यानि उदाहरणानि प्रस्तुतानि तान्येव विविधवक्रोक्तिचर्चावसरे कुन्तकेन निरूपितानि । इति शम् ।।*

---

## सङ्केताक्षरसूची

भा. का.अ – भामहकाव्यालङ्कारः

ध्व. आ – ध्वन्यालोकः

व.जी – वक्रोक्तिजीवितम्

पृ – पृष्ठम्

द्वि.उ – द्वितीयोन्मेषः

तृ.उ - तृतीयोन्मेषः

**पादटिप्पणीः**

1. भा.का.अ – 1.10
2. ध्व.आ – 1.13 (वृत्तौ पृ – 104 - 105)

3. व.जी – 1.10 (वृत्तौ)
4. व.जी – 1.10
5. व.जी – 1. 7 (वृत्तौ)
6. व.जी – 1.18 (वृत्तौ)
7. व.जी – 1.20 (वृत्तौ)
8. व.जी – 1.10
9. ध्व.आ – 1.4
10. ध्व.आ – 1.6
11. व.जी – 1.11 (वृत्तौ)
12. व.जी – 2.1
13. ध्व.आ – 3.2
14. ध्व.आ – द्वि.उ पृ-176
15. व.जी – 2.12 (वृत्तौ)
16. ध्व.आ – 3.16
17. ध्व.आ – 3.16 (वृत्तौ पृ - 380)
18. ध्व.आ -तृ.उ - पृ- 380
19. व.जी – 1.20
20. व.जी – 4.25 (अन्तर्श्लोकः)
21. व.जी – 4.26

## सहायकग्रन्थसूची


1. काव्यालंकारः, आचार्यभामहः, मोतीलालबनारसीदास, 1983
2. ध्वन्यालोकः, आनन्दवर्धनः (सं) पं दुर्गाप्रसाद परब, मुन्शीराम मनोहरलाल पब्लिकेशन्स प्रा.लि 1983
3. वक्रोक्तिजीवितम् . कुन्तकः,(सं) के.कृष्णमूर्तिः, धारवाड, कर्णाटकविश्वविद्यालयः 1977
4. वक्रोक्तिजीवितम् (हिन्दी). कुन्तकः, (सं)डा.नरेन्द्रः,दिल्ली,हिन्दी अनुसन्धान परिषद् ,दिल्लीविश्वविद्यालयः 1955


## "चोदनालक्षणोऽर्थो धर्मः" इत्यत्रार्थपदविमर्शः





नारायणदत्तमिश्रः[18]

**वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥[19]**

**आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना । यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥[20]**

एवं वेदादिभिरुक्तं तद्विनिश्चितञ्च धर्मपदार्थमालक्ष्य विविधशास्त्राणाम्प्रवृत्तिर्दरीदृश्यते । तत्रापि साक्षाद् वेदसम्बद्धेषु तदङ्गेषु विषयस्यास्य विवेचनं किञ्चिदपूर्वमिति सुविज्ञातमेव तथ्यम् । अस्यामेव वेदाङ्गसरण्यां मीमांसायां सम्प्रधारितं धर्मलक्षणं तस्य च प्राधान्यं स्वीकृत्य मीमांसा नाम वेदाङ्गं धर्ममीमांसेत्यपरनाम्नाऽपि प्रसिद्धम् । यथोक्तं भामतीटीकाकारेण – धर्ममीमांसावद् वेदार्थमीमांसया ब्रह्ममीमांसाऽप्याक्षेप्तुं शक्या[21] , इति । अपरञ्च ब्रह्मसूत्रस्थमन्यप्रसङ्गाधृतं वचनमिदमपि "धर्मं जैमिनिरत एव"[22] धर्मेण सहास्य वेदाङ्गस्याद्वितीयं संलग्नत्वं स्पष्टीकरोति ।तथाऽप्यत्र धर्मपदार्थस्तु विशिष्य कर्मकाण्डं किं वा यागादिकमेव लक्षयतीति प्रसिद्धिः ।

एतादृश्यां धर्मसमन्वितायाम्मीमांसायाम् अस्याः सुदीर्घपरम्परायाञ्च धर्मसम्बद्धं तथ्यात्मकं विवरणं बहुशो जातम् । इह , लेखेऽस्मिंस्तु मीमांसाशाबरभाष्यादिषु प्रतिपादितं धर्मलक्षणमाधृत्यैव विचार उपस्थापयिष्यते । विचारस्यास्य प्राग् किन्नाम मीमांसेति तावत् प्रथमत उल्लिख्यते ।

अयं हि मीमांसा शब्दः , मान् पूजायाम्[23] इत्यर्थमूलकाद् धातोः मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य[24] सूत्रेणानेन सन्प्रत्यये द्वित्वादिकार्ये च जाते , गुरोश्च हलः[25] सूत्रेणानेन प्रत्ययान्ताद् धातोरस्माद् "अ" इति प्रत्यये , अजाद्यतष्टाप्[26] सूत्रेणानेन च स्त्रीत्वविवक्षायां टापि ततोऽनुबन्धादिकार्ये च सम्पादिते निष्पद्यते ।

पाणिनिविहितधात्वर्थानुसारं पूजार्थक एव मीमांसाशब्दः परं वार्तिककारेण कात्यायनेन तु मानेर्जिज्ञासायाम्[27] इति वचनाधारेण विचारार्था जिज्ञासेति मीमांसाशब्दार्थः स्वीकृतः ।

सिद्धान्तकौमुदीकारेणापि विचारणे तु भौवादिको नित्यसन्नन्तः[28] , इति वचनोपन्यासेन विचारणाऽर्थ एव मीमांसाशब्दस्य प्रतिपादितः ।तस्माच्छाब्दिकीम्परम्परामाश्रित्य पूजितविचारो मीमांसाशब्दस्यार्थ

---

[18] विशिष्टसंस्कृताध्ययनकेन्द्रम्,जे.एन्.यू.,नवदेहली
[19] मनुस्मृतिः , 2/6
[20] अत्रैव , 12/106
[21] मीमांसादर्शन का विवेचनात्मक इतिहास , पृष्ठसङ्ख्या - 20
[22] अत्रैव , पृष्ठसङ्ख्या - 23
[23] वैयाकरणसिद्धान्तकौमुदी , धातुसङ्ख्या - 1041
[24] अष्टाध्यायी , सूत्रसङ्ख्या -3/1/6
[25] अत्रैव , सूत्रसङ्ख्या -3/3/103
[26] अत्रैव , सूत्रसङ्ख्या -4/1/4
[27] वार्तिकम् (अष्टाध्यायी , सूत्रसङ्ख्या -3/1/6)

इति वक्तुं शक्यते । यथा हि मीमांसाशब्दार्थो भामतीकारेण पूजितविचारवचनो हि मीमांसाशब्दः[29] , इत्यनेनावबोधितः ।

मीमांसाशब्दार्थविचारात् परं धर्मलक्षणन्तावद् इदानीम्प्रदर्श्यते । तथा हि जैमिनिसूत्रम् –

चोदनालक्षणोऽर्थो धर्मः(जैमिनिसूत्रम् 1/1/2)[30] , इति ।

चोदनावचनेन लक्ष्यत इति चोदनालक्षणम् , चोदनालक्षणो हि धर्म इति विशेषणविशेष्यभावोऽत्र स्पष्टः । चोदनालक्षणो धर्मः स चार्थ एवेति चोदनालक्षणोऽर्थो धर्मः , इत्यस्य जैमिनिवचनस्य सामान्योऽर्थः । सूत्रगतपदविचारक्रमे प्रथममिह चोदनापदार्थः स्पष्टीक्रियते । प्रवर्तनया किं वा प्रेरणया संवलितस्य वचनस्यैवापरन्नाम चोदनेति। यथा हि लोके कश्चिच्छिष्यो गुरोर्वचनं श्रुत्वा तद्वचनाधारेण यस्मिन्नपि कस्मिन् कर्मणि संलग्नो दृश्यते तथैव वैदिकेष्वेव वचनेष्वपीदृशानि वचनानि यानि प्रवर्तनया पूरितानि भवन्ति , तानि चोदनयाऽभिधीयन्ते । यथोक्तं शाबरभाष्ये चोदनेति क्रियायाः प्रवर्तकं वचनमाहुः[31] , इति ।अतः परमेव चोदना हि भूतम्भवन्तम्भविष्यन्तं सूक्ष्मं विप्रकृष्टमित्येवञ्जातीयकमर्थं शक्नोत्यवगमयितुं नान्यत् किञ्च नेन्द्रियम् [32] इत्यनेन चोदनावचनानि किं वा वेदनिहितानि प्रवर्तकानि वचनान्येव चोदनाशब्देनोक्तानि , तानि च वेदस्यैव परमप्रमाणत्वाच्चोदनावचनेभ्यो नान्यत्प्रमाणापेक्षार्हाणीति विशदीभवत्यनेन लक्षणेन । लक्ष्यते येन तल्लक्षणमिति विग्रहवाक्यानुसारेणेह चोदनाया प्रवर्तनाया वा लक्षणमेवं विनिर्धारितञ्जातम् ।

प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते ' वचनाधारेणानेन धर्मलक्षणेऽर्थ इत्यस्य पदस्य प्रयोगो विहितो वर्तते । अर्थ्यत इत्यर्थो विग्रहोऽयं श्रेयस्कररूपमर्थम्प्रति सङ्केतयति । तस्माच्छ्रेयस्कररूपार्थ एव चोदनालक्षणो धर्म इत्युच्यते । परन्त्वत्र चोदनालक्षणे धर्मे कथमर्थ इत्यस्य पदस्य योगो जात इत्येव तावद् वर्तते विवेच्यविषयः । यतो हि प्रतिपादितम्प्रवर्तनावचनञ्चोदना वा सर्वदैवार्थकरमेव स्याद् अथ केन कारणेनार्थशब्दस्योपादानञ्जातमिति प्रश्न उत्पद्यते । प्रश्नस्यास्योत्तरं शाबरभाष्ये निर्दिष्टं शबरस्वामिना – उभयमिह चोदनया लक्ष्यतेऽर्तोऽनर्थश्चेति । कोऽर्थः । यो निःश्रेयसाय ज्योतिष्टोमादिः । कोऽनर्थः ? यः प्रत्यवायाय श्येनो वज्र इषुरित्येवमादिः । तत्रानर्थो धर्म उक्तो मा भूदित्यर्थग्रहणम् ।[33] एतद्वचनानुसारं तथ्यमिदञ्ज्ञायते यद् वस्तुतो न केवलं वेदवचनान्यर्थे श्रेयस्करे वा कर्मण्येव प्रेरयन्त्यपितु कतिचिद् तन्निहितान्येव वचनान्यश्रेयस्करे कर्मण्यपि प्रेरयन्तीव प्रतिभान्ति । यथा हि “ ज्योतिष्टोमेन स्वर्गकामो यजेत ” वचनं हीदं निःश्रेयसप्रयोजनानुगुणं श्रेयस्करम् किं वाऽर्थः , इति । परं श्येनः , वज्रः , इषुरित्यादिसम्बन्धिता यागास्तु कथञ्चिद् अनर्थत्वमेव विस्पष्टीकुर्वन्ति , एतादृशानां यागानां किं वा

[28]सिद्धान्तकौमुदी , पृष्ठसङ्ख्या - 423

[29]मीमांसादर्शन का विवेचनात्मक इतिहास , पृष्ठसङ्ख्या - 17

[30]अत्रैव , पृष्ठसङ्ख्या - 104

[31]शाबरभाष्यम्, पृष्ठसङ्ख्या - 06

[32]इहैव , पृष्ठसङ्ख्या - 07

[33]शाबरभाष्यम्, पृष्ठसङ्ख्या - 11





तत्सम्बन्धितानां वचनानामपि धर्मत्वेनोल्लेखो यथा न स्याद् एतदर्थम् अत्र लक्षणेऽर्थ इत्यस्य प्रयोगोऽनिवार्य इति प्रतिभाति । वस्तुतस्त्वेतत् सर्वं विषयं शाबरभाष्ये पूर्वपक्षिविहिताक्षेपं खण्डयित्वा न श्येनादयोऽपि यागा अनर्था इति वक्तुं शक्यते , इति स्वकीयम्पक्षं शबरस्वामी मण्डितवान् ।

तच्च वचनं शाबरभाष्यानुसारमिहोल्लिख्यते – कथम्पुनरसावनर्थः ? हिंसा हि सा । हिंसा च प्रतिषिद्धेति । कथम्पुनरनर्थः कर्तव्यतयोपदिश्यते ? उच्यते – नैव श्येनादयः कर्तव्या विज्ञायन्ते । यो हि हिंसितुमिच्छेत्तस्यायमभ्युपाय इति हि तेषामुपदेशः । “ श्येनेनाभिचरन् यजेत ” इति हि समामनन्ति नाभिचरितव्यमिति ' ।[34]

अत्र तावत् पूर्वपक्षीयाणामुत्तरपक्षीयाणाञ्च मतोल्लेखोऽनेन शाबरभाष्यवचनाधारेण विशदीक्रियते । पूर्वपक्षीयाणामनुसारं कथं श्येनादयो यागा अनर्थाः कथ्यन्त इति प्रश्नो विधीयते । तस्योत्तरन्तु श्येनादीनां यागानां हिंसात्वम्प्रदर्श्य तस्य प्रतिषिद्धताया उल्लेखेन दीयत उत्तरपक्षिभिः किं वा स्वयं शबरस्वामिनैव । परमपरोऽयम्प्रश्नः पूर्वपक्षीयैरुत्थापितो यत् , “ श्येनेनाभिचरन् यजेत ” इत्यत्र हिंसाविषयस्य ज्ञानेऽपि यजेत , पदेनानेन कथं कर्तव्यतयोपदेशः क्रियते ? प्रश्नस्योत्तरन्तूत्तरपक्षीयैः , न श्येनादियागे कर्तव्योपदेश इति वक्तुं शक्यते वचनस्यास्य केवलं शत्रुवधार्थम् अभ्युपायमात्रविषयत्वात् , न च वस्तुतस्तत्राभिचरेद् इत्युल्लेखो विधीयते तस्मादपि कर्तव्यतयैवास्योल्लेखो विद्यत इति कथमपि न वक्तुं शक्यत इत्येवं वचनोपन्यासेन शबरस्वामिनाऽत्र श्येनादीनां यागानाम् अकर्तव्यता साधिता तथाऽपि तन्निष्ठाऽनर्थता तत्र सन्तिष्ठत एव , तस्माद् धर्मलक्षणप्रसङ्गे यथाऽनर्थविषया धर्मत्वेन न स्वीकर्तव्यास्स्युरिति धिया तज्जैमिनिविहिते धर्मलक्षणेऽर्थपदस्य योगो विद्यत इति , अर्थशब्दसम्बद्धो विचारश्शबरस्वामिना स्वकीये भाष्ये निरूपितः ।

“ चोदनालक्षणोऽर्थो धर्मः ” ईदृशे सूत्रस्वरूपे स्थिते वाक्यभेदो नाम दोषोऽत्र भविष्यतीति पूर्वपक्षिणामपरः प्रश्नः । अत्र वाक्यभेदः कीदृश इत्युक्ते चोदनालक्षणो धर्मो नेन्द्रियादिलक्षण इति प्रथमं वाक्यम् अतः परम् अर्थश्च धर्मो नानर्थ इति द्वितीयं वाक्यस्वरूपन्तैः प्रदर्श्यते । अस्य वाक्यभेदरूपस्य दोषस्य निराकरणं भाष्यकारेण , न वस्तुतोऽत्र वाक्यभेददोषः कल्पनीयः , नहीदं सूत्रं वैदिकं यत्र वाक्यभेदन्दृष्ट्वा दोषस्यापतनमिति कथयितुं शक्यते सूत्रस्वरूपस्यास्यावैदिकत्वात् किं वा साक्षादेव वेदादसम्बद्धत्वात् , सूत्रस्वरूपस्य च केवलेनार्थेन सह सन्निहितत्वाच्च । अतो वाक्यद्व्याधारेण भिन्नम्भिन्नं वाक्यम्प्रस्तोतुं शक्यते । अपरञ्च समाधानानुसारं सूत्रस्वरूपेऽस्मिंस्त्वर्थानुसारम् विषयसाम्यन्तन्निहितमैक्यं वा सन्तिष्ठत एव । अतोऽत्र वाक्यभेदो नाम दोषावसरो न कल्पनीय इति निर्धारितम् ।

विचारस्यास्याधारं शाबरभाष्योल्लिखितं वचनमिदन्तद्यथा – नन्वशक्तमिदं सूत्रमिमावर्थावभिवदितुम् । चोदनालक्षणो धर्मो नेन्द्रियलक्षणः अर्थश्च धर्मो नानर्थ इति । एकं हीदं वाक्यन्तदेव सति भिद्येत । उच्यते

[34]अत्रैव , पृष्ठसङ्ख्या - 11

। यत्र वाक्यादर्थोऽवगम्यते तत्रैवम् । तत्तु वैदिकेषु न सूत्रेषु । अन्यतोऽवगतेऽर्थे सूत्र्मेवमर्थमिदमित्यवगम्यते । तेन चैकदेशः सूत्र्यत इति सूत्रम् । तत्र भिन्नयोरेव वाक्ययोरिमावेकदेशावित्यगन्तव्यम् । अथवाऽर्थस्य सतश्चोदनालक्षणस्य धर्मत्वमुच्यत इत्येकार्थमेवेति । [35]

विषयस्यास्य विस्तृता व्याख्या कुमारिलभट्टेन श्लोकवार्तिके नैकैश्श्लोकैर्विहिता । तेषां समेषां श्लोकानां सारतत्त्वम् इह कतिचिच्छलोकोपस्थापनेन सह तदन्तर्गतम्भावं स्पष्टीकर्तुम्प्रयासो विधीयते ।

श्येनेनाभिचरन् यजेत ' अत्र शाबरभाष्यकारेण यन्निषेधतयाऽनर्थत्वं स्वीकृत्य वचनस्यास्य प्रत्यवायादिनोल्लेखो विहितो न तदनर्थत्वार्हम् इत्यस्य विचारस्य प्रस्तुतिः कुमारिलभट्टेन श्लोकवार्तिक एवं कृता –

चोदनालक्षणो यश्च श्येनादिभिरिह गम्यते । निषेधाभावस्तस्य कथम्ब्रूयादनर्थता ॥[36]

एतद्वचनानुसारं श्येनादिवचने वस्तुतश्चोदनालक्षणत्वमेव सन्तिष्ठते तस्माद्विधिवचनत्वमत्रोपलब्धमस्ति न निषिद्धताऽत्र लक्षिता वर्तते , तस्माद्वचनस्यास्यानर्थत्वं नैवेति पूर्वपक्षिणाम्मतम् ।

श्येनेनाभिचरन् यजेत ' अत्र शाबरभाष्यकारेण येन प्रत्यवायादिना वचनेनास्य निषेधत्वमुक्तं न वस्तुततस्तस्य वचनस्य निषेधोपलब्धितयोपस्थापनं कर्तुं शक्यते । यद्येवं निषेधतयाऽस्य वचनस्योल्लेखो विधास्यते तर्हि तु षोडशिग्रहणादिप्रसङ्गस्यापि निषेधत्वेन कल्पना स्वीकार्या भविष्यति । तथा हि सुविज्ञातमिदन्तथ्यं वर्तते यत्तद् वचनं नास्ति निषेधवदिति वचनस्य तस्य विधिनिषेधयोर्द्वयोरपि स्थित्योस्तस्मिन्नेव वचनेऽपरिवर्तितस्य रूपस्य तत्रैव सन्निहितत्वात् । तस्माद् यथा षोडशिग्रहणादिप्रसङ्गस्य निषेधत्वाभावः कल्प्यते तथैवात्रापि वचनेऽनर्थत्वं न कथयितुं शक्यत इति निर्णीयते ।[37]

अपरं च चोदनालक्षणत्व उक्तेऽपि कथं श्येनेनाभिचरन्नित्यादिवचने निषेधस्याक्षेपः क्रियते किं वा तत्रैव श्येनेनाभिचरन् यजेतेत्यनेन तद्विशिष्टयागार्थम्प्रेर्यते तत्रैव च हिंसात्वमभिलक्ष्य निषिद्धतया तस्योल्लेखो न वस्तुतोऽत्र युज्यत इति पूर्वपक्षिणामपरम्मतम् । एतस्यास्समस्यायाः प्रदर्शनं किं वा द्वयोर्विषययोः पृथग्भावत्वं स्पष्टीकृत्य शाबरभाष्यमतस्यास्यासमीचीनता प्रदर्श्यते कुमारिलभट्टेन पूर्वपक्षिणाम्मतमाधृत्य । तथा ह्येतत्सम्बद्धौ श्लोकविमौ -

चोदनालक्षणञ्चोक्त्वा निषिद्धत्वाद् विरुद्ध्यते । श्येनादावुपदिष्टे च हिंसा हीति न युज्यते ॥[38]

हिंसा हि फलमेतेषाम्भिन्ना तेभ्यः स्वरूपतः। सा हि प्राणवियोगोत्था श्येनस्तत्रासिवत् पृथक् ॥ [39]

---

[35]शाबरभाष्यम, पृष्ठसङ्ख्या - 11

[36]मीमांसश्लोकवार्तिकम, श्लोकसङ्ख्या - 202

[37]यद्य स्याद् विधिस्पृष्टे निषेधो नैव तादृशः ।

विज्ञायते ह्यनर्थत्वं षोडशिग्रहणादिवत ॥ (मीमांसश्लोकवार्तिकम, श्लोकसङ्ख्या - 203)

[38]मीमांसश्लोकवार्तिकम, श्लोकसङ्ख्या - 204





एवमेव विधेयाविधेयादीनाम्[40] अथ भावनांशानामुल्लेखेन[41] पूर्वपक्षिणाम्मतं समीचीनतया स्पष्टीकरोति कुमारिलाचार्यः ।

एतदनन्तरम्पूर्वपक्षिमतानां किं वा तेषामाक्षेपानां निराकरणमुपस्थाप्यते । कुमारिलाचार्येण तु प्रथमं समाधानमिदमुल्लिखितं यद् वस्तुतोऽत्र चोदनालक्षणमिदमेव मन्यते प्रवर्तकं निवर्तकञ्च वचनम् इति । परम् अर्थः , पदस्यास्य धर्मलक्षणसन्दर्भे प्रयोगो नानेन वचनाधारेण मत्वा विहितो जैमिनिनाऽपितु चोदनेति क्रियायाः प्रवर्तकं वचनमाहुरिति वचनमेवाधाररूपेणात्र कल्पितो वर्तते । तस्मादेवात्र लक्षणेऽर्थशब्दस्य प्रयोगः पूर्वपक्षिविहिताक्षेपेण सह न भवति वस्तुतः सम्बद्धः। अर्थस्यास्योपस्थापकोऽयं श्लोकः श्लोकवार्तिककारेणैवमुल्लिखितस्तद्यथा –

तेनैवमर्थशब्दस्य प्रयोजनमिहोच्यते । प्रवृत्तौ वा निवृत्तौ वा या शब्दश्रवणेन धीः ॥
सा चोदनेति सामान्यं लक्षणं हृदये स्थितम् । प्रवर्तकगृहीतेस्तु स्यादुदाहरणता ॥
तात्पर्ये ह्यर्थशब्दस्य नेयं व्याख्योपपद्यते । अर्थग्रहणलभ्यं वा तत्प्रवर्तकभाषणम् ॥[42]

इतोऽग्रे विधेयाविधेयादीनाम्अथ भावनांशानामुल्लेखेन या विप्रतिपत्तय उत्थापिता आसन् , तेषां समेषामेव निराकरणम् [43] अनयैव रीत्या श्लोकवार्तिके कुमारिलाचार्येण प्रदर्शितम् ।

अनया दिशैव भावनांशादिसम्बद्धा विचाराः , ये पूर्वपक्षिमतानां निराकरणायोल्लिखिता जातास्तेषां समेषाम् अथ हिंसासम्बद्धाक्षेपा अप्यत्र श्लोकवार्तिके स्पष्टीकृताश्श्लोककारेण । इह समासेनैव श्लोकवार्तिके विविक्तानाम्पूर्वपक्षिणामाक्षेपविषयस्याथ तेषामाक्षेपनिराकरणविषयस्योपस्थापनं विहितं वर्तते वस्तुतस्तु विशषेणैतत्सम्बद्धा विवेचनास्तत्रैवानुशीलयितव्याः ।

एवमिह चोदनालक्षणोऽर्थो धर्मः , इत्यत्र सम्पूर्णस्य वचनस्यार्थशब्देन सह कः सम्बन्धः किं वा किम्प्रयोजनमत्र लक्षणेऽर्थः पदस्येति विषयोऽयं शाबरभाष्यदिशा स्पष्टीकृतः ।

## सन्दर्भान्विता अनुशीलिताश्च ग्रन्थाः

१. श्रीमच्छबरस्वामिप्रणीतं शाबरभाष्यम् (विवेकहिन्दीव्याख्यासमन्वितम्); व्याख्याकारः – गजाननशास्त्रिमुसलगांवकरः ; प्रकाशनम् – चौखम्बा संस्कृत सीरिज आफिस , वाराणसी ; संस्करणम् –2004 तमे ख्रीष्टाब्दे ।

२. गजाननशास्त्रिमुसलगांवकरविलिखितं मीमांसादर्शन का विवेचनात्मक इतिहास ; प्रकाशनम् – चौखम्बा विद्याभवन , वाराणसी ; संस्करणम् –1992 तमे ख्रीष्टाब्दे ।

---

[39]अत्रैव , श्लोकसङ्ख्या - 205

[40]मीमांसश्लोकवार्तिकम, श्लोकसङ्ख्या - 206

[41]अत्रैव , श्लोकसङ्ख्या - 207

[42]अत्रैव , श्लोकसङ्ख्या -210 - 212

[43]व्विधेयाविधेयादीनां निराकरणप्रसङ्गः -213 - 217

३. कुमारिलभट्टप्रणीतम् मीमांसाश्लोकवार्तिकम् (हिन्दीव्याख्यासहितम्); सम्पादकः – नारायणमिश्रः ; प्रकाशनम् – कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः , दरभङ्गा ; संस्करणम् –2001 तमे ख्रीष्टाब्दे ।

४. कुमारिलभट्टविरचितम् मीमांसाश्लोकवार्तिकम् (भूषणाख्यटीकसहितम्); टीकाकर्ता – ई. श. वरदाचार्यः ; प्रकाशनम् –राष्ट्रियसंस्कृतसंस्थानम् , नवदेहली ; संस्करणम् –....तमे ख्रीष्टाब्दे ।

५. हरिहरकृपालुद्विवेदिप्रणीता कल्पकलिका (शाबरभाष्यव्याख्यानभूता तर्कपादान्ता) ; सम्पादकः – ब्रह्मदत्तद्विवेदी ; प्रकाशनम् – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः , वाराणसी ; संस्करणम् –1987 तमे ख्रीष्टाब्दे ।

६. मण्डनमिश्रविरचितं मीमांसादर्शनम् ; सम्पादकः– पट्टाभिरामशास्त्री ; प्रकाशनम् – श्रीलालबहादुरशास्त्रिकेन्द्रियसंस्कृतविद्यापीठम् ; नवदेहली ; संस्करणम् –1983 तमे ख्रीष्टाब्दे ।

७. माधवजनार्दनरटाटेलिखितो मीमांसादर्शनविमर्शः ; प्रकाशनम् – भारतीय विद्या प्रकाशन , दिल्ली ; संस्करणम् –2008 तमे ख्रीष्टाब्दे ।





## Krut Suffixesin DevelopingThe Networkof SanskritWords

**Dr. Pritilaxmi Swain**[44]

---

**ABSTRACT:** *Verbal suffixes have a very significant role for deriving krudanta forms of words. Just as the word 'pAcaka' is derived from the root pac with nvuL. Panini has mentioned nearly 140 krut suffixes in his Astadhyayi. All these suffixes are applied to the roots only. Each of the krut suffixes represents a semantic relation between a verb root and its form. These relations may be classified into the following: kartA, karma, karana, sampradAna, apAdAna, adhikarana, bhAva, bhuta, bhavishyat, AbhIksnya, Avasyaka, atisarga, nimitta, auchitya, yogyatA etc. This paper shed some light on the role of krut suffixes in developing the network of Sanskrit words.*

---

**Keywords:** Krut Suffixes, DhAtu, PrAtipadika, Pada etc.

---

**INTRODUCTION:**

***Arthapravruttitattvanam shabda eva Nibandhanam|***
***Tattvavabodhah Shabdanam Nasti Vyakaranadrute||***

(Va.,Brahmakandam)

From this verse, we know that without grammar the real significance of a word cannot be achieved properly. By grammar we can make analysis of words of different classes. For e.g., if we analyze the word '*Vyakarana*' we find a root, a prefix and a suffix. So here *vi*' is a prefix, *A* is a prefix, *kru* is a root and *lyut* is a suffix. Out of many facets like kAraka, samAsa, vibhakti,

[44] Assistant Professor, Department of Sanskrit, Pali &Prakrit,Bhasha Bhavana,Vishva-Bharati, Shantiniketan, West Bengal-731235

lakArartha, sandhi, krdanta, taddhita etc. of paninian Sanskrit grammar here discussion is based on some of the points of krut suffixes.

Out of different types of derivation of words the primary derivation in the Paninian system of grammar is that of a pada. The name "*shabdanushAsana*" which means an instruction of words is ascribed to grammar which indicates the control of grammar over the words.

Panini used word-derivation as the most economical tool for obtaining the meaning of a sentence. By this he makes generalizations, abstracts the conceptual structure of sentences, inserts lexical items and introduces affixes to denote diverse syntactico-semantic relations. He then follows a set of operations which ultimately yield a pada. Thus, the highest derivate in the Paninian system is a *pada*. Paninian pada is a syntactic unit. These units are of two types depending upon whether the pada ends in a sup or in a tin.

The operational aspect of the Paninian derivative system focuses mainly on *Prakruti* (bases), *Pratyaya* (suffixes) and *KArya* (operations). Bases form the primary input in grammar. They are of two kinds, dhAtu (verbal root) or *PrAtipadika* (nominal stem) to which suffixes are added and following a set of operations a pada is obtained. For example, a pada like '*rAmah* ' can be derived from the prAtipadika '*rama*' and the pratyay 'su '.

Verbal suffixes play a very significant role in derivation of Sanskrit words. Panini has given certain rules for deriving *krudanta* forms of words. Just as the word '*pAcaka*' is derived from the root pac with *nvuL*. He has mentioned nearly 140 krut suffixes in *AstAdhyAyI*. All these suffixes are applied to the roots only. Some of the Krudantas take noun inflexions while others are indeclinable.

Each of the krut suffixes represents a semantic relation between a verb root and its form e.g., if we add *nvvl* suffix to the verb root *kru* we will get the word *karaka* with the help of some operations. This *nvvl* suffix here represents a semantic relation of *kartru* between the root *kru* and its form *karaka*. These relations may be classified into the following:

*Kartru, karma, karana, sampradAna, apAdAna, adhikarana, bhAva, bhuta, bhavisyat, praisya, astisarga, prAptakAla, sAmarthya, aucitya, yogyatA, nimitta* etc.

There is no one to one mapping between a krut suffix and the semantic relation. Each of these relations may correspond to more than one krut suffixes and krut suffix may represent more than one semantic meanings. For example, the suffix *ghan* occurs in the sense of all six *kArakas* as well as *bhAva*.

*AtmArAma (Atmani ramate iti)(sAdhuh)* is the kartru artha of *ghan* suffix by the rule *kartari krut* (3.4.67).*abhravarsha(abhreih varshyate, sthAnam)* is the karma sense.We will get *apAmArga(apamrujyate anena byaghradih iti apAmArgah)* by the rule *halashca* (3.3.121) in the karana sense. *dAsa(diyate/dAsyate vA vrutirasmei)* is the *sampradAna* artha of *ghan*. AhAra*(Aharanti asmAd rasam)* is the apAdAna artha of *ghan* by the rule *akartari ca kArake samjnAyAm* (3.3.19). *rAma(ramante yoginah asminniti rAmah)* is the adikarana artha of this by the rule *halashca* (3.3.12) and *pAka(pacanam)* is in the bhAva sense by the rule *bhAve* (3.3.18).

Similarly, there is more than one suffix which expresses the same meaning. The forms like *pAka* with suffix *ghan* by the rule *bhAve* (3.3.18), *jaya* with *ac* by the rule *erac* (3.3.58),*stav* with *ap* by the rule *rudorap* (3.3.57),*Ataman* with *lyut* by *the rule lyut ca* (3.3.115),*gati* with *ktin* by the rule *striyam ktin* (3.3.94) express the meaning of bhAva .





There are also certain cases where the krut suffix, the verb-root and the forms obtained thereby are same but the meanings concerned are quite different. Just as from the root *path* with *anIyar* we will get the form *pathanIya* in the sense of *praisha*(direction), *atisarga* (granting permission), *prAptakAla* (proper time), *arha* (fitness as regards the agent is implied), *bhAva* (action). By the rule *preishatisargapraptakaleshu krutyashca* (3.3.163) the meaning of praisha,atisarga, prAptakAla are implied. By the rule *arhe krutyatrucashca* (3.3.169) the arha meaning is expressed and by *tayoreva krutyaktakhalarthAh* (3.4.70) the sense of bhaAva is implied.

The distinguishing feature of krut suffixes is that noun forms of words are obtained when they are added on to the roots. Just as from the root *kru* with *truc* we will get the prAtipadika *kartru*.

Semantically, if we classify the krut suffixes we will get two broad classifications. One is *krutya-krut pratyaya* (from *dhAtoh* (3.1.91) to *tavyattavyAnIyarah* (3.1.132)) and the other is *akrutya-krut pratyaya* (shesha-krut pratyaya) (from *nvultrucaou* (3.1.133) to *ktodhikarane ca dhroubyagatipratyavasanarthebhyah* (3.4.76)).Again, we devide krutya pratyaya into two types that is karma and bhAva by the rule *tayoreva krutyaktakhalarthAh* (3.4.70).This karma is of several types i.e., *yogya, vidhi, shakya, prAptakAla* etc.

*Shesha-krut pratyaya* is divided into two parts i.e., *nirupapada* and *sopapada(kartA).sopapada(kartA)* is of four types : (I) *kartA(an)* e.g. *kumbhakArah (kumbham karoti iti)* by the rule *karmanyan* (3.2.1). (II)*tacchIlakartA(ta)* e.g. *vacanakarah,sukhakarah(vacanam karoti iti,sukham karoti iti)* by the rule *kruno hetutAcchIlyAnulomyeshu* (3.2.20).(III)*bhUtakartA(nini)* e.g. *somayAjI(somena ishtavan)* by the rule *karane yajah* (3.2.85).(IV) *bhavishyakartA(nini)* e.g. *somayAjI (somena ishtavan)* by the rule *karane yajah* (3.2.85).

*Nirupapada* is of four types. They are *bhAvavAcaka, vishishtakriyAkAlavAcaka, kAlavishishtakArakavAcaka,kArakavAcaka*.The suffixes like *ghan, ac, ap, lyut,ktin* etc. are included in *bhAvavAcaka*. *vishishtakriyAkAlavAcaka* has two parts: *pUrvakAlavAcaka* and *uttarakAlavAcaka.ktvA* suffix by *samAnakartrukayoh purvakAle* (3.4.21) e.g., *bhuktvA* and *lyap* by *samAse ananpUrve ktvo lyap* (7.1.37) e.g. *Agatya* are included in *pUrvakAlavAcaka*. *Tumun* suffix by *tumunnyulou kriyAyAm kriyArthAyAm* (3.3.10) e.g. *bhoktum* is of *uttarakAlavAcaka* type.

